C.D

C.D

CENTRAL LIBRARY, BARODA.

SANSKRIT SECTION.

Acc. No. 9570 Subject वल्लभ

Name संप्रदाय प्रदीप (कृष्णात्मज प्रश्न निर्णय)

this is the ... chapter

सं. 1610. Author गद्द. द्विवेदी

Age 1735 सं. Extent 40. ~~800~~ 750.

Language S Script N

युधिष्ठिर ३०४४
विक्रम १३५
शालिवाहन १८०००
विजयाभिनंदन १००००
[illegible] ४०००००
राजाबलि ८२१

४३२०००

युधिष्ठिरोविक्रमशालिवाहन
स्ततोन्टपःस्याद्विजयाभिनंदनः॥१
तत[illegible]श्चनागार्जुनन्टपतिर्ब
लिःकलौयुगेषट्शककारका
न्टपाः॥१॥क्रमेणवेदाब्धिखखवह्न
यस्तथाष्टराग्निवेंद्राखखखखा
द्विन्नयस्ततोयुतं[illegible]लहचतु
ष्टयंपरंकुपद्दनानाशकवत्स
राद्दमो॥२॥

यति जयति क… सर्वलोकैकबंधुः ॥ ॥ योनुग्रहार्थं प्रकृतिगणपिकानांगि
द्धर्मजनिरासमध्ये बन्धवेभ्यः सकलैकलोका सामंत विलसदि
दैकनामा ॥ ॥ स एवब्रह्मयोजनिवल्लनाख्यः स्वकीयमादात्म्यमवाप्तियेन ॥ न
त्मरूपं तमहं करोमि तत्संप्रदायक्रममुक्तसर्वं ॥ ॥ श्रीवल्लभ… आत्मजवि
लरोप्रणतिप्राणिहितैकदत्तौ भागवतदीयं किंचव स्परिष्टोपगतस्त्विधो व
कृपयामतीदं ॥३॥ तत्राद्दोषस्य विकावमानं ॥ बर्हापीडमौलौ बिभ्रद्वंशीनादामा
त्तानाकल्पैः श्रीतत्पन्नो गोपस्त्रीभिः संवीतः नेत्रानंदं कुर्वन्रक्तस्त्वं वेदस्मान् ॥
वीचेष्टा सर्वकामाः संपद्येरन्नस्माकं कृष्णासीना ॥ गुर्वहार बध्वाए कपलसमुच्यते ॥

पलषष्ट्येका घटी भवति । घटीषष्ट्याहोरात्रं मनुष्याणां । त्रिंशद्भिरहोरात्रैर्मासः । मासै
र्द्वादशभिर्वर्षं । वर्षाणां सप्तदशलक्षैरष्टाविंशतिसहस्राधिकैः कृतं भवति । द्वादश
लक्षैः षण्णवतिसहस्राधिकैः त्रेता । अष्टलक्षैः चतुःषष्टिसहस्राधिकैर्द्वापरं । चतुर्लक्षै
र्द्वात्रिंशत्सहस्राधिकैः कलिर्भवति । एवं चतुर्युगं । एकसप्ततिचतुर्युगैर्मन्वंतरं भवति । चतु
र्दशमन्वंतरैर्ब्रह्मणो दिनं तावत्येव रात्रिः । एताह[illegible]होरात्रैस्त्रिंशद्भिर्ब्रह्मणो मासः ।
मासैर्द्वादशभिर्वर्षं । एवं वर्षशतं परमायुर्ब्रह्मणः । यथोक्तं ज्योतिःशास्त्रे । शतायुः शतानं
द एवं प्रदिष्टस्तस्यायुर्महाकल्प इत्युक्तमाद्यैः । अतो नादिमानेष कालः स तो दिनवे ष्यत्र पञ्चो
त्वाघेगन्तान ब्रह्मणो वर्षशतेन मनुष्याणां द्विपरार्ध्यवर्षाणि भवंति । परार्ध्यसं[illegible]
ख्यागणकशास्त्रे । एकदशशतात मस्मात्सहस्रमयुतं ततः परं लक्षं प्रयुतकोटिमप्या

द्धंमहद्वर्वनिखर्वंचतस्मान्महासरोजंशंकुंसरितांपतिंतन्नस्तत्संमध्यंपरार्ध्यंस
माहुर्यथोत्तरंदशगुणंतज्ज्ञाः ।तत्रचतुर्विधःप्रलयः ।। यथोक्तंहरिवंशे स्कंधेश्रीभाग
वते नित्योनैमित्तिकश्चैवतथाप्राकृतिकोलयः ।आत्यंतिकश्चकथितः कालस्यग
तिरीदृशी ।। नित्यःप्रलयस्तल्लक्षणं ।नित्यदासर्वभूतानांब्रह्मादीनांपरंतप ।उत्पत्ति
प्रलयावेकेसूक्ष्मज्ञानंप्रचक्षते ।।निमित्तलक्षणं ।चतुर्युगसहस्रांतेब्रह्मणोदिन
मुच्यते ।सकल्पोयत्रमनवश्चतुर्दशविशांपते ।।तदंतेप्रलयस्तावान्ब्राह्मीरा
त्रिरुदाहृता ।त्रयोलोकाइमेयत्रकल्प्यंतेप्रलयायहि ।।२।। एषनैमित्तिकःप्रोक्तःप्रल
योयत्रविश्वसृक्शेते नंतासनोविश्वमात्मसात्कृत्यचात्मभूः ।।३।। अथप्राकृ ।।२।।
तिकः ।। द्विपरार्धेत्वतिक्रांतेब्रह्मणःपरमेष्ठिनः ।तदाप्रकृतयःसप्तकल्प्यंतेप्रलया

वै आयू।

यदि॥७॥ एव [illegible] ति को [illegible] राजनृ प्रलयोयत्र लीयते। आंड को शास्त्र संघातो वि
घातत्व पसादितः॥ प॥ अथ आत्यंतिकस्य लक्षणं। यदैव मतेन विवेक हेतिनामायाम
याहंकरणात्मबंधनं छित्वा मुक्तात्मानुभवावतिष्ठते न मा जरा संतिकमंग संबव।
॥३॥ ब्रह्मण एकैक वर्षमध्ये त्रीणि शतानि षष्ठ्याधिकानि भवंति प्रलयाः। नैमित्तिक दैनंदि
न नामानं [illegible] प्रतिरात्रं सप्तम पातालादारभ्य मह
र्लोकं यावत् ब्रह्मणः प्रतिदिनं तु नः पुनः सुरासुरनरादीनां सृष्टिर्भवति॥ यथो [illegible] कं त
था वर्त्तमानस्यैकस्यायुषोऽर्धं गतं। सार्धवर्षाष्टकं केचिद् ब्रुवुः। ब्रह्मणः स्वकीय मानेन त्र
य पंचाशद्वर्षाणि अर्धं वर्षं वायुरतिक्रांतं। अर्धवर्षस्यांतिमदिवसस्य श्वेत वराह कल्प
इति संज्ञा। ब्रह्मणः प्रथम वर्ष जन्मदिनादारभ्य आस्यपा पाद्म यो ब्रह्म वा कल्पः व्य

तीताः। तत् केन संख्यातुं शक्यते। केचित्कल्पाः सात्विकाः। केचिद्राजसाः। केचित्ताम
साः। सात्विकेषु विष्णोः स्तुतिर्भवति। राजसेषु ब्रह्मणः रु[illegible]द्रात्तामसेषु कदाचिद्भ
गवत्याः। देव्याः। पुराणेष्वेवमनेकधा दृश्यते। तन्नासौ विरोधः। तदस्मिन् श्वेतवराहक
ल्पाख्ये ब्रह्मणो दिवसे षण्मन्वंतराण्यतीतानि। स्वायंभुव १ स्वारोचिषः २ उत्तमः ३ ताम
सः ४ रैवतः ५ चाक्षुषः ६ अतीताः षडेते मनवः। वैवस्वतो वर्त्तमानः सप्तमः ७ अग्रे भ
विष्याः सावर्णिः ८ दक्षसावर्णिः ९ ब्रह्मसावर्णिः १० धर्मसावर्णिः ११ रुद्रसावर्णिः १२
देवसावर्णिः १३ इन्द्रसावर्णिः १४ ॥ तपः सत्यं दयादानमिति वृषः पादा ४ कृतयुगे वृष ॥३॥
वा त्रेतायां त्रिपात्। द्वापरे द्विपात्। कलावेकपात्। ब्राह्मणक्षत्रियवैश्यशूद्रा इति वर्णाः। ब्र
ह्मचारिगृहस्थवानप्रस्थयतय इत्याश्रमाः। एषां नित्यानैमित्तिककाम्या दिने दिने ध

मेविदेनोकः। अनुयुगमनुमन्वंतरं भगवदवतारैर्भवति प्रतिमन्वंतरं पृथग्गिंद्राः। सप्त
ऋषयश्चार्द्धानुयायिनो देवाश्च। मनुपुत्राश्च राजानः। वेदादिशास्त्रप्रवर्त्तकाः ऋषयः॥
त्रिलोकीशासनकारश्चेंद्राः। अधर्मिघातको भगवदवतारः। दंडनीत्याधर्मपालका राजानः। अनु
मन्वंतरं प्रतिद्वापरं एकस्मन्ति वेदव्यासाः भवंति। अस्मिन् श्वेतवाराहकल्पे वैवस्वतम
न्वंतरे अष्टाविंशतिमे द्वापरे पराशरात्मजः सत्यवतीनंदनः कृष्णद्वैपायनो बभूव। येन
वेदा व्यस्ताः कृतं च वेदांतशास्त्रं। महाभारतं च। श्रीभागवतं च। तस्मात् वेदव्यासमतमाश्रि
त्य द्वापरतः इदानींतना अपि धर्मार्थकाममोक्षहरिभक्तिरिति पुरुषार्थपंचकं प्रवर्त्तयंति॥
कृतादिद्वापरांतं धर्मार्थकाममोक्षाणां प्रवृत्तिः॥ कलौ हरि[illegible]भक्तिरेव। पुरुषार्थः॥ मत्स्यक
पात् कृते त्रेतायां अन्येषामृषीणां मतमाश्रित्य धर्मादयश्चा मंत्र अन्येषामवताराणां मत्स्य
नृसिंहरामादीनां भक्तिः। कलौ कृष्णस्य भक्तिरेव। वेदव्यासस्यापीष्टदैवतत्वात्। कलौ देवोम

ईश्वरः॥ कलौ चंडिविनायकौ॥ कलौ रामेति कीर्तितं॥ इति पुराणं॥ दिव्ययाद्रुश्यपतेत
सत्यं परं तन्नायं क[illegible]लि॥ अन्ये तु कनयः॥ कृता॥ न विप्राः॥ येतनारादकस्मै वैवस्व
तमन्वंतरे द्वाविंशति मकलि विषयं ब्रह्माउ पुराण विषयं द्रष्ट्वा तस्या चोक्तं॥ कलौ
ह्रासदस्त्राणि विष्णुस्तप्त हति मेदिनी॥ तदर्धे जाह्नवी गंगा॥ तदर्धे सुरदेवता॥ ॥ लता
हि धा पुराणं ये वेदोक्त वर्णाश्रमेतर धर्म परा बलवत॥ तेषां धर्मस्त्रिविधा फलेनित्यः॥ ये
स्वधर्म त्यागधारः॥ स्वर्गाद्यानित्यानि फलाः कलेरादितः समाप्ति पर्यंत स्वर्ग सुखभोक्तस्य
त्ति ये मुमुक्षवः ते निकाम स्वधर्मतो वैराग्य पूर्वक ज्ञान योगेन सांख्य वेदांतयो
॥ त्रास्त्र वेदांत श्रोतो क्रमार्गेण नानाविधं मोक्षं प्राप्ता॥ येत्वेतत्कलेर्गुणज्ञाः कं ॥८॥
लेराद्य सहस्त्र वर्ष मध्यावतारमिछति॥ यथोक्तं श्रीभागवते एकादशस्कंधे

मुक्तबंधः परं व्रजेत्

कलिं सभाजयंत्यार्या गुणज्ञाः सारभागिनः। यत्र संकीर्तनेनैव सर्वस्वार्थोपलभ्य
ते॥ ॥कृतेसध्यायतो विस्नुं त्रेतायां यजतो मखैः। द्वापरे परिचर्यायां कलौ तद्धरिकी
र्तनात्॥ ॥ कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः। कीर्तनादेव कृष्णस्य सर्व
स्वार्थोपलभ्यते॥ ॥ कृतादिषु प्रजा राजन्कलौ विछंति संभवं। कलौ खलु
नविष्यंति नारायणपरायणाः॥ ॥ क्वचित्क्वचिन्महाराज द्राविडेषु च भूरिशः। ताम्रपर्णी
नदी यत्र कृतमाला पयस्विनी। कावेरी च महापुण्या प्रतीची च महानदी। ये पिबंति जलं ते
तासां मनुजा मनुजेश्वर। प्रायो भक्ता [illegible] भगवति वासुदेवेमलाशयाः। वेदोक्तपद्धत्या
गन्मुजादेवाः ब्रह्मरुद्राः किं गणपतिवस्वादित्यसाध्यविश्वेदेवादयो ब्रह्मां[illegible] पुराणेक्त काले उ २
वर्तिष्यंति॥ कलौ गंगा च उत्कल देशे सागर तीरे पुरुषोत्तम क्षेत्रे जगन्नाथ रूपेण विष्णु

स्वतावत्कालं कलौ वैष्णवाव तरंति ॥ श्रीजस्मादन्ये देवतानवास्य ततः कलौ सि
द्धिर्नैव त्वति ॥ अन्यमंदिरं प्राप्य एकं वत्स ॥ धर्मस्य सिद्धि स्वाहत्रीनान्न वति ॥ धर्मस्यैकपा
द ख्याता ॥ नस्माद्य योक्तं [illegible] ज्ञानेना ॥ सर्वधर्मेषु नष्टेषु [illegible] स्वधर्मेणि ॥ पाषंडप्रचु
र लोके [illegible] एव यांति [illegible] जिनेक पालकाम्लेछ कौलिकादयो [illegible] पाषंडा वेदमार्गाद्बहिः
कलौ निरय [illegible] यदा ॥ यथोक्तो [illegible] धर्मे निरत [illegible] तादि द्वापरांतं [illegible] जाजो [illegible] जनम
नाजस्तया वत्कालं कलि [illegible] वंति ये कलौ जीवास्ते वै निरयगामिनः ॥ कृतादि द्वापरांतं
[illegible] वैकालं [illegible] वंति ॥ कर्मणा मनसा वाचा
श्रीसत्संप्रदायिनं जं तियो संप्रदायिगुरो व्याविरातन्ते विष्णानेकलर्नरा ॥ ११ ॥ इति स्कंदपुराणे वाक्यं तु ॥
दो२ वैष्णवधर्मविहीनत्वात् सर्वे निरयगामिनः ॥ अनाश्रित्य हरिं जीवाः कलौ पापं [illegible] ॥ २ ॥ केचिद्दि ॥५॥
[illegible] मदंयाति धर्मस्यैकपदाश्रयेण स्वर्गं [illegible] नां मध्ये कोपि यास्यति ॥ अन्ये सर्वेपि निरयगामि

न इति चेद्विष्णुमुक्तायद्योक्तं ब्रह्मवैवर्ते। यथाकारः कालनिर्णयेः कालस्वरूपेण केवलं सङ्ख
छस्तु पञ्चाशये [illegible] कं सकं इति स्मृतं॥ आद्यं दश सहस्रं तु पञ्चवस्त्रपं प्रकीर्त्तितं तदूर्ध्वं द्वितीयं संज्ञं
स्यात् कलिकालं तु नीरसं॥३ साधिकोऽस्मस्तत्र च स्यादानंतेयं वोऽनवेतस्तत्राधिको मध्यमना
मयुक्त सारं शाव जीवनः। एवमादि कलिर्दुष्टो धर्मराजो दिवं पतः॥ ततः सत्व धर्मस्य ग्लानि
राहीनकता [illegible]॥४॥ पञ्च वर्ष सहस्रांतं एव मध्यं प्रकीर्त्तितं। स धर्मो निगवः शक्तिस्ततः कालेन
वर्धते॥ ततो वृत्तायुतस्यान्तं यवस्यां तं वदति हितं त्वन्न कियच्च धर्मस्य क्रमादतं व्रजिष्यति॥५॥ प्रभु
क्रराहीनितीर्यं निर्गमाद्याः सरितस्तपाः॥ सत्त्वसुर्यश्च शेते ज्ञा [illegible] गम्या मानुषैस्ततः॥६॥ न विष्णं
स्या तिष्कलो घोरे [illegible] धवर्षायुतात्परं॥ रक्तांतितेषु [illegible] स्यं तिदुष्टाद्यापदं स्मृतः॥७॥ एवं श्री मन्नृपयुधि
ष्ठिर राज्य समायात् दश सहस्र वर्ष पर्यन्तं कलो भागवतामन [illegible] तीति सिद्धं। ननु ब्रह्मणोऽभिमोक्ते नित्य

नैमित्तिकविधानश्चन्येकलौ भागवतानां तदकरणे प्रत्यवायो न स्यात् वान विष्यतिन स्यादितिश्री
भागवते। एकादशस्कंधे। कलिविषये वाक्यानि देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राज
न्। सर्वात्मनायः शरणंशरण्यंगतो मुकुंदं परिहृत्यकर्त्तं॥१॥ तत्रैवा। तावत्कर्माणि कुर्वीत न निर्विद्येत
यावता। मत्कथाश्रवणादौ वा [illegible] श्रद्धा यावन्न जायते॥२॥ पुनश्चाज्ञानतिष्टो इरको वा मज्ञतो वा न
पेक्षकः। स्वनिगतानामभावात् तस्माद्वेदविधिगोचरः॥३॥ बुद्धिपूर्वं निषिद्धाचरणं नैवाचरंति भा
गवताः परंतु ईश्वरेच्छया निषिद्धाचरणे ईश्वरशरणागतानां ईश्वर एव प्रत्यवायं निवारयति यथा चो
क्तं भगवद्गीतासु। ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति॥ भ्रामयन् सर्वभूतानि यंत्रारूढानि मा
यया॥१॥ तमेव शरणं गच्छ सर्वभावेन भारत। तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्व
तं॥२॥ मत्तोऽन्यमीश्वरं ज्ञा[illegible]स्यतीति मत्वा पुनर्भगवतोक्तं। मन्म[illegible]ना भव मद्भक्तो [illegible] मद्याजी ॥३

मा न मस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥ सर्वधर्मान्परित्यज्य मामे
कं शरणं व्रज । अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ९ ॥ तद्वै वृथा । अपि चेत्सु
दुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः ॥ ३ ॥ अनरे का
दृशस्कंधे । स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः । विकर्म यच्चोत्पति
तं कथंचिद्धुनोति सर्वं हृदि संनिविष्टः ॥ ५ ॥ तत्रैव वाक्यदिकादशस्त्रिमादेन योगी कर्म विगर्हि
तं । योगैर्नैव वदेहं दृढो नान्यथा त्वं कदाचन ॥ त्रयो योगास्त्रयः ज्ञानकर्मभक्त्याख्याः । अनन्यत्वं ग्रामाथि
त्वादि ॥ ॥ इति श्रीसंप्रदायप्रदीपे श्रीविष्णुस्वामि पाद्रे बिल्वमंगलावतारे श्रीवल्लभदीपशि
षित मार्गप्राचिकजनतमो निवृत्तौ प्रथमं प्रकरणं ॥ १ ॥ अथ वाऽउत्तमन्त्वाद्य विजेन्द्र द्विर्वृद्धिकसार
दकेगता । कविकविमहाराष्ट्रस्त्रजरेषुलयं गता ॥ ६ ॥ युधिष्ठिर मम यावत् किंचित्कलौ गते द्वाविंशे

स्नेह३ १२७

शुकक्षिप्रावत्त्व। येनधर्मेणाखिलं ज्ञातं तंवर्षे वर्णीतं तानस्यराज्ञः सकलजनाद्धोरेयः
सखिवोब्राह्मणोबभूव। तस्यब्राह्मणस्यात्मजः श्रीविष्णुस्वामासीत्॥ सश्रीशुकपौत्रस्तातृश्री
दाश्रीगोपीजनवल्लभस्यांशएव। योयदृशः सतनजे दितिवाक्रोता। रूपेणकामः वेदार्थीवि
द्ययाचचतुर्मुखः। बुद्ध्याचबृहस्पतिः। धनवान्यथाधनदः। भोगवान्यथापुरंदरः। किमधिकंवे
दोपवेदेतिहासपुराणोपपुराणस्मृतिकुपस्मृतिवेदांगसांख्यवेदांतयोगमीमांसकवेत्रय
शैवतंत्रादिविद्यायणां कृष्णद्वैपायनः। साहित्यवात्स्यायनादिषुवात्स्यायनोपाध्यायः। यदाजाग
वर्तीस्वदृष्टिः स्थितोभवतिवैतदाभगवान्विष्णुःस्वधामानंसृजतिस्वयं। तन्मात्रिश्रि
तजनाःसर्वे व्रक्लिताजोनवंतिहि। मेदीस्तांनेवलीवहृदयेदाश्रित्यपश्यंतिवा॥२॥ वत्वार ७॥
स्तवकशोभनाध्यायः संप्रदायप्रवर्तकाः। भविष्यंतिप्रसिद्धास्तत्कुलकलेषुकलिकालमात्र॥३॥ त

स्वपत्नी विलासिनि कदाचिन्मनसि विचारः समजनि। कथमहं पितुरधिको गुणैर्भवेयं। राज
सेवया नादृ ब्याभिः संप्रति नमेऽभ्युदयः ईशोस्म दृशो राजास्ति तादृशोन्यो नास्ति। सचिवेषु राज्ञः
सेनापति तानुगुणस्तादृशं यथास्ति तादृशः सचिवो न्यो नास्ति। अतः सेवायै देव कोपि महापः
राजा राज्ञोऽधिको नैव सेव्यः। सा तु सोपीशानुयायी। तर्हि ईश्वरः ईशानुवर्ती अन्ये पियमाग्नि वरु
णाद्यः। तर्हि स एव सेव्यः। तस्यापि मान्यत्वेपि चतुर्ब्रह्मास्ति। तमप्यचीमेत्यचो सातिकृतिः। तर्हि
ब्रह्मैवेश्वरः स सेव्यः। ब्रह्मापि श्रीनारायणनाभिपद्मजन्मा श्रूयते। तर्हि नारायण एव सर्वेश्वरे
श्वर इति सिद्धं। सोपि मत्स्याद्यवतारैरवतीर्य त्मानमन्यमानः स्वतपं तपुनर्भजनध्यायन श्रूयते॥
पुराणेषु परतंत्र इवाश्रुतः सर्वेश्वरतोऽधिको हि कः सर्वेश्वरेश्वरः कं सेवे ध्यायामीति निश्चयं तत्र गा
मा पुनः पुनश्च विचारवान्मतं वेदमूलशास्त्रेषु मरीयांसो वेदाः। वेदेषु पवित्रपदः उपनिषत्सु बृ
हदारण्यकं माध्यंदिनीयाशाखास्वासर्वस्वाधारणं मतादृतिश्चमते। अतो यजुर्वेदिस्योपनिष

१ समारा३

दियः सर्वेश्वरः एककः समेप्रभुः। सेव्यश्च। स्ववायमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः
सर्वमिदं प्रशास्ति। यदिदं किंचन साधुनाकर्मणा भूयान्नोवाकनीयानिष भूताधिपतिरेषलोकेश्व
र एषलोकपालः स सेतुर्विधरण एषां लोकानामसंभेदाय। इति सत्यकामं सत्य संकल्पं
सर्वज्ञं सर्व गं अचित्यानंतशक्तिं सकलचराचरं तत्तज्ञं न गदीश्वरं सर्वश्रिपिउपनिषदा वदंति। परंतु
तस्य नामरूपादि न ज्ञायते कथं तं भजामि इत्यपृच्छत॥ राजसेवामाता अजोपचारौ वभवति॥ अत्रो
पनिषदुक्ते सर्वेश्वरे नामरूपाभावे कथं भक्तिः कीर्तिश्च। अत्र नामरूपाणां महाराजसेनुके मंदिरराजो
पचारविधिना महाराजः सेव्यते। तथाहं एकरूपमपि जगदीश्वरं परिचरिष्यामि। सर्वतोभद्रकवस्त
त्रकपालः अतो पठितः। अतो दर्शयिष्यति स्वरूपं। हृदि इति निश्चित्य भगवन्नामं नतवान्॥ मनस्वा
मिनैवेष्टिहारामतां जलजलाशयशय्यासिंहासनछत्रचामरपादुकाचंदनकर्पूरकस्तूरीसुग
धगंधजलपानपात्रभोजनपात्रधूपदीपनीराजनशयनभोजनविहारस्नानस्थानरथनरवाहनो ॥८॥
आसनजविनिकाविताननीडाप्रपंचसहितं सर्वमितिचकार। अनंतरं मातारान्यकमेण महाराजसेवकव

न्नाद्येन प्रतिबोधितं तथा च नके श मार्जनादि माहात्म्य योग पर्यंतं अनुदिनं च कार। परं भगवान् न गृ[illegible]ति।
अगृहीते मार्जनादौ पश्चात्तापं चकार॥ पश्चादिति निश्चितवान् अ[illegible]या च तु मत्कृतां सेवां साक्षाद्भ
गवान् गृह्णाति तावदहं न भोक्ष्ये। न पयः पास्यामि। अनुदिनं भगवद्दर्श[illegible] भोजनादिकं स्थितं भग
वता न गृहीतं जलाशये तत् क्षिपति स्म। एवं षट् दिनानि गतानि। ततः अपर[illegible] प्राणत्यागः
त्रेतायां मांसापगमे। द्वापरे रुधिरक्षये। कलौ अन्नाद्येनैव। एवं कलिकलेवरत्वात् तु [illegible] शरीरं ग्ला
निमवाप। ततः स्वगतमिदमाह॥ अहो अ[illegible]ति वाक्य प्रमाणेन दर्शयन्नेव। सर्वत्र कृपालुः पठितः। अ
तः कथं मत्कृतां सेवां न गृह्णाति। ज्ञातं कोपि मयि शारीरो दोषो वर्तते। अतः परं क्लेशेनापि दिनमेकं से
वां करोमि॥ यदि न भगवान् न गृह्णाति तदाग्निप्रवेशं करिष्यामि। इति निश्चित्य परस्मिन् दिवसे भोजनं
कर्तुमारब्धं यथास्थानं सेवासाधनानि संस्थाप्य कपाटे पिधाय बहिः स्थितः। ततो भगवान् तं
गवानाविर्बभूव। सेवकजनेन सह॥ शृंगारस्थाने शृंगारसाधनानि नीतानि। ततो भोजन
स्थाने भोजनं कृतं शयनमपि कृतं। बहिस्थितेन विष्णुस्वामिना ज्ञातं॥ द्वारमुद्घाट्य गृहीतं। समा

गतो भगवंतं ददर्श सुतं वयसि कैशोरे द्विभुजं पीतवाससं नवीननीरदश्यामं पद्मपत्रनिभेक्षणं ।
रुचिरोष्ठपुटन्यस्तवेणुवादनतत्परं ॥ शि[illegible]खिपिच्छावतंसेन शोभितं वनमालया ॥२॥ हारकंकण
केयूरमुद्रिकाभिरलंकृतं सुंदरं सुंदरं नितंबनाभिमेखलयायुतं स्फुरन्नूपुरझंकारवारमोरसिकंमु
दा । कालिंदीपुष्टशृंगाररसमूर्ति मनोरमं ॥४॥ पीतोत्तरीयसंवीतत्रिभंगललिताकृतिं ॥ गच्छन्मंडल
संमिलितसत्कांचनकुंडलं ॥५॥ तुंगगुल्फाकृणनखव्रातदीधितिनिषेवितं ॥ पाणिपादतले पद्मपत्रा
रुणतयान्वितं ॥६॥ सर्वदा हि गणैर्दिव्यैस्तत्र कांचनसंनिभैः । वयोरूपगुणोपेतैर्हृद्यो वाचमुदान्वि
तः ॥७॥ भगवान्शास्त्र दृष्ट्वा त्वां सगुणं जाने मयोपनिषदुक्तः सर्वेश्वरस्यापर्यायसेवा कल्पिता । अ
सो निर्गुणः । त्वया स्वीकृता मत्कृता सेवा । वैदिकतांत्रिकमार्गे प्राप्ये त्वां [illegible] स्वरूपं जानाति । नम
मतत्र सर्वेश्वरबुद्धिः अत्र संदेहनिराकरणं त्वयैव भवति । नैसावंछिंधि शास्त्रसमंत्या मानं प्र
प्रमाणीकुरु । पश्चात्तां प्रणमामि ॥ श्रीभगवानुवाच ॥ नैन्यसन्नो न्यईश्वर सर्वकोप्यस्ति तेन ॥८
त्वमत्र तासैवां कथं न गृहीता । मया वीरधर्मेण गृहीता चेत्तर्हि कथं न रक्षिता । अध्यापितं विशा

पय। केनोयो मे दं दा स्याति। इति श्रुत्वा पुनर्न्नगवंतमाह।। देवसर्वात्मना त्वां प्रपन्नोस्मि कृप
या मदीयसंशयं छिंधि। तेनोक्तं ईश्वरोला। स्तिशा स्त्रसंमता स्त्वदीयमात्मकं पय। श्रीनगवाना
त्मासा स्वसर्वेश्वरेश्वरोहमस्मि तावदुपनिषत्संमतमाह।। तस्मात्तुरीयंसांगादुत्तसिंद्धतं गत
या अथर्वणोपनिषदि। तस्मात्वै परमं देवं गोविंदान्मुमुक्षुर्जिनेति।। श्रीगोपीजनवल्लभो भुवनानिद
ध्ने इतितत्रैव च। अनेजदेकंमनसोजवीयो नैतद्देवा आप्नुवन्पूर्वमर्शत् तत्स्मएवपरोदेवस्तं
ध्यायेत्तं नमेत्तं नजेदिति श्रुतिः। अन्यच्च। रुबिर्न्दी त्वन्वक भाक्षानस्य निर्वृतिवाचकः। तयोरैक्यं प
रं ब्रह्म कृष्ण इत्यभिधीयते।। यथोक्तं हरिद्धामनपुराणे। तत्रस्थानेन्ते। तादात्म्यतिब्र
स्मणो वाक्यानि। षाष्टिवर्षैमादित्रिंशाद्धोकाः। पुनर्न्नगवता विष्णुस्वामिनं प्रत्युक्तं। सोम्य ममस
र्वेश्वरत्वं प्रतिपादकानि वाक्यानि वेदादिषु संति नवा।। विष्णुस्वाम्याह। संति बहुधा। श्रुरु
ब्रह्मणोनिष्कानातं डितः। सगुणं मत्तं हरिरूपं लिंगं मत्वमनेतिनेतीति विहायनिराकारं चिन्मा

ब्रह्मपादिशांति तैरेव सिद्धांतितं तच्चलोकस्वरूपादिति पामतेन सर्वपिद्धेन स्विष्यति। तदा कायु
क्तिःशास्त्रीयातन्निवारणाय सोप्यसत्यं तेपि शास्त्रार्थमाश्रित्य वदंति। परंतु मायावादिनो
ह्यसुरां सर्वशास्त्रफलदमेव। तेषामसुराणां मतः पराङ्मुखीकरणार्थं तिशास्त्रं मदीक्षयैव
प्रावर्तत। तेन जगदनित्यं मन्यंते। कथं सत्यस्वरूपान्मत्तो जातमनित्यं भवति॥ यतो वार
मानि भूतानि जायंते येन जातानि जीवंति। तत्र त्यानि विशंति तद्ब्रह्मेति श्रुतेः॥ कारणा
नुमेयं कार्यं भवतीति न्यायः। तस्मात्सत्यस्वरूपात्त जातं सत्यमेव। परंतु मन्मायामोहि
तयोऽसुरभक्तयोऽस्यात नमतं न बुध्यंति। [illegible] ॥प्रपंचानित्यकरणे भगवद्भजन
साधनं फलं च नित्यं न भवति। तस्मिन्ननित्ये जाते न कोपि दृढश्रद्धो भवति। एतदर्थं तु वादिनो ११२०
ब्रह्मवादिनः सर्वं खल्विदं ब्रह्मेति श्रुतिप्रामाण्यात् प्रपंचं नित्यं मन्यते॥ यथाग्निष्टोमे
न स्वर्गकामो यजेतेति। कर्मणा चित्तशुद्धिर्भवति। चित्तशुद्ध्या मनो ज्ञानं। ज्ञानेनैवा

तमश्राहेमोश्चं इति स्वर्गञ्जामप्राति फलं दर्शितिं। तपोचनार्थंपि तच्छ्रुतिः इति तेषां सिद्धांतं
प्रपंच सत्पकरणे पितद्वत्॥ एवं शास्त्रं भवत्। परं प्रपंचो नित्य एव। मायेत्यसुराः इति श्रुते॥
भगवद्गीतासु च। आसुरप्रकृतीनां लक्षणं असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं। चतु
र्भुजाद्याकारैर्मर्यादेवासुरविरोधे ऽभयादेवानां पक्षपातः। ततः अतः एव चतुर्भुजाद्या
कारे असुराणां द्वेषः। निराकारं प्रतिष्ठंते। सोहमस्मीति मन्यमाना हि र एष कश्चित्
कंस वेन पौंड्रकादयो मत्तो न्यो जगदीश्वरो नास्तीति वदंति स्म। असुराविष्टादेवाश्च स
र्वेपि सोहमस्मीति [illegible] वादीति शास्त्रा एषा श्रित्य निश्चयं कृतवंतः। अधुनापि ये केवलं
दैवीं प्रकृतिं गतास्ते दा सोहमस्मीति मां भजंति। यथोक्तं भगवद्गीतासु। महात्मानस्तु
मां पार्थ दैवीं प्रकृतिमाश्रिताः। भजंत्यनन्यमनसो ज्ञात्वा भूतादिमव्ययं॥ २॥ याव

दविद्याबद्धस्तावज्जीवत्वं। अविद्यानिवृत्तो जीवो ब्रह्मैव भवति। अतो यावद्बंधस्ताव
ज्जीवेश्वरयोर्भेदः मोक्षे जीवभावनिवृत्तौ एकमेवेति। मायावादिमतं। अनित्योऽत्र पंचानि
त्यं ब्रह्मेति च सगुणब्रह्मोपासनया नत्यापि मुक्तिरेव दुरुबाधः। निखिलमपि भक्तिशास्त्रं मु
क्तिसाधनं मन्यंते। नैतन्मतमस्माकं। ब्रह्मवादिभिर्जीवस्य नैवृत्येपि ब्रह्मानंदरूपविनाशोनां
शाश्वंशी [illegible] सेवकसेव्यतयानंद एवमुक्तानपि॥ अत्र श्रावि सोस दुजा इति ह्वः प्रमाणं। इति
श्रुत्वा विष्णुस्वामिनमाह। भगवन् निःसंशयोऽहमस्मि। त्वमेव सर्वेश्वरेश्वरः। पुनर्भगवानाह। सोम्य यन्म
नसीप्सितं तद्ब्रूहि। विष्णुस्वामिनमाह। श्रुतिषु न। किं शास्त्रेषु प्रपंचस्य मिथ्यात्वं वस्तुतो जीवेश्वर
योरभेदत्वं दृश्यते तत्किं। भगवानाह। तत्सत्यं। परं मिथ्येति पदं वैराग्यार्थं। वस्तुतो जीवेश्वरयो
रैक्यं शोकमोहभयादिनिवृत्तये प्रतिपादितं। तत्र को मोहः कः शोकः एकत्वमनुपश्यत इति श्रुतेः। अ
हमानंदमात्रकरपादतलोदरो गुणत्रयातीतो क्षरादुत्तमः पुरुषोत्तम एव। मद्भक्ता मत्समान ।।११।।

समधर्ममिदं शा एवानेकजीवत्वे तेषु । दृश्यमानं ने दोष्यभेद एव सेव्यसेवकलीलयाहमेव स-
दावर्त्ते । अथ मयाप्य कार्यं तद्ब्रूहि । विष्णुस्वाम्याह ॥ देवत्वं नैनैव स्वरूपेण सपरिवारस्त्वं मंत्रे वर्त्ति-
ष्ठ । यथा राजसेवकवत्त्वां परिचरेयं । श्रीभगवानाह । संप्रति कलिकालो वर्त्तते । न देवता साक्षात्वं
तर्हि मम कथं मे देवो न मस्य । अतो न प्रतिमां कारय । अस्य पश्मिन्नेव पुरे विश्वकर्मांशः शिल्पिक-
कर्त्ताऽस्ति सो मां दृष्ट्वा मम रूपसमां मत्प्रतिमां करिष्यति । विष्णुस्वाम्याह । देव एवं वेत्र हि वैदिकतांत्रिको-
क्तदेवालयप्रतिष्ठासकलीकरणादौ कलिकाले देशकालपात्रद्रव्यश्रद्धासंपदादिविधिः । कथं पूर्णो
भवति ॥ विष्णुं न लेकथं विश्वासः । पुनर्भगवानाह । दृष्टमात्रा मत्प्रतिमा(?)तिः साक्षादहमेव मंतव्यः । सेव-
स्व । विष्णुस्वाम्याह ॥ एवं कृते मत्कृतं तंत्रशास्त्रीयं । पाखंडं वेदबाह्यं मन्यंते । महाराजन् । पुनर्भगवानाह ॥
यथा मंत्रन्यासप्रतिष्ठादौ कृते प्रतिमायां वेदब्राह्मणवचनेन देवतासा(?)निध्यं करोति । तथा केवले-
न प्रेम्णा देवतासान्निध्यं करोतीति वेदवाक्यानि संति । ततो वाचयाज्ञवल्क्यस्तस्मादात्महिताय

प्रेम्णा हरिं भजेत वचसा तन्नामानि कीर्तयन् ॥ इति श्रुतेः । न देवो विद्यते काष्ठे न मृत्सु च न चाश्मनि
भावे हि विद्यते देवस्तस्माद्भावे [illegible] हि कारणं । केवलेन हि भावेन गोप्यो गावः खगा मृगाः ॥ इत्येका
दशस्कंधे ॥ द्वेष्टेन हिरण्यकशिपुना । को ऽस्ति तव स्वामी यस्त्वां प्रह्लादेन सर्वत्रास्तीत्युक्ते । पुनर्हिरण्य
कशिपुना कस्मात् स्तंभे न दृश्यत इत्युक्ते हरिः स्तंभात् प्रादुरासीत् । तत्र को मंत्रः का प्रतिष्ठा किं स
कलीकरणं । केवलं भक्तिभाव एव । केवलं प्रेम भावहीनानां वैदिकतांत्रिकोक्त मार्गेधिकारः । मद्युक्तो
य मार्गः श्रीमद्गीतासु भगवद्गीतासु श्रीभगवतोक्त एव । अतः फल मार्गोयं । निगम कल्पतरोर्गलितं
फलं शुः श्रीभागवतमुच्यते । अतोयं मार्गो वैदिक एव न तु पाषंड [illegible] अशास्त्रीयश्च ॥ इति श्रुत्वा वि
ष्णुस्वा[illegible]मिना सर्वत्र साकारयित्वा साक्षाद्भगवंतं दर्शयित्वा प्रतिष्ठापिताः कारापिता । पुनर्भ
गवता विष्णुस्वामिनं प्रत्युक्तं । सौम्य भगवद्गीता श्रीभागवतं मे शास्त्रं । अहमेव देव एक ॥१२
एव । भक्तस्त्वमसीति पंचाहार वाक्यनाम निवेदनं नामैव मंत्रः । मा[illegible] राजोप[illegible]चार

धा १३

विधिना सेवा। एव कर्म। यस्य संप्रदायी भूत्वा यशोदा गोपी उद्धवादिवत् परिचरिष्य
ति। मां प्रति मा रूपमपि साक्षान्मच्चातत्त्वतां सेवां कुनरावकृरिष्यामि। यथोक्तं द
शमस्कंधे। श्रीभागवते। गताध्वन:श्रमौ तत्र मज्जनोन्मर्दनादिभि:। नीवीं वसित्वा रु
चिरां दिव्यस्रग्गंधमंडितौ॥ जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ। संविश्य सुख
शय्यायां सुखं सुषुपतुर्व्रजे॥२॥ भागवतोयं सेवामार्ग:। वैदिकतांत्रिकविधानज्ञान
वेदांतसांख्ययोगवर्णाश्रमधर्मादयो भागवते दृश्यंते। ते सर्वे सिद्धिमार्गसाधनान्येव॥
मुक्तेर्गरीयसी भक्ति:। गीताभागवतयो: फलं। तात्पर्यं च। इत्युक्त्वा भगवानंतर्हित:। अथ
विष्णुस्वामी नगरे तु क्रमेणानुदिनं सेवां चकार। तेन तपसा शिष्यसंग्रहोपि कृत:। येना
नुगृहीतास्ते गोपीजनवल्लभं प्रापु:। विष्णुस्वाम्यपि लोकसंग्रहतो वर्णाश्रमधर्मरक्षा

र्थं त्रिदंडीयतीन्भूत्वा भगवत्कृतिंगतः ।।   ।। इति संप्रदायप्रदीपे श्रीविष्णुस्वामिचरितं द्वि
तीयं प्रकरणं ।। ७   ।।२।। अथ श्रीविष्णुस्वामिसंप्रदाये बिल्वमंगलनामा बभूव ।। बिल्व
मंगलो द्वावन्तौ तां ।। उत्कलदेशीटतीयश्च ।। यस्याष्टोत्तरशतश्लोकसंख्याकं स्तोत्रं श्रूयते ।।
एकः काश्यपां ।। एको द्राविडे च ।। द्राविडदेशीयो विष्णुस्वामीसंप्रदायी ।। यो काशीवासी सोद्विती
यजन्मनि जयदेवनामा बभूव ।। येन श्रीगीतगोविंद [illegible] गानं कृतं । तस्य चत्वारः श्च तारः
प्रथमं माधवानलो ब्राह्मणो बभूव । द्वितीयजन्मनि वेल्ह्लणनामा पंडितः । तृतीयजन्मनि बि
ल्वमंगलबालणः चतुर्थेजन्मनि जयदेवः । कामकंदलो । शशिकलो काश्यपां वेश्यो । पद्माव
तीतिक्रमादारभ्य श्रीगोपीजनवल्लभनारभ्येतत्वे द्वयोरप्येकमत्यं । बिल्वमंगलो विष्णुस्वामिमार्गं ।।२३।।
प्रशासत्ति शिष्पतया बहवो गोपीजनवल्लभनतलविदो बभूवुः । तदा भगवान्तत्वज्ञानैर्नाधि
कारिणो जनानत्वा पुरातनीं पौराणिकीं कथामनुसस्मार ।। अत्रांतरे श्रीमहादेवः कैलाशशिख

रसिद्धवटतरुतलेरत्नवेदिकायां व्याघ्रचर्मासने उपविश्य श्रीशुकरूपोत्तमं समाधिना चिंतया
मास। समाधौ भगवान् श्रीमहादेवं प्रत्याह॥ यथोक्तं पद्मपुराणे॥ द्वापरादौ युगे भूत्वा कलया
मानुषादिषु। स्वागमैः कल्पितैस्त्वं च जनान् मद्विमुखान् कुरु॥ मां च गोपय येन स्यात् सृष्टिरेषो
त्तरोत्तरा॥ तदेव पुरा दिष्टमपि मत्वा वतितीर्थं बभूव। एतस्मिंनंतरे दक्षिणात्ये जनपदे कश्चित् शि
वभक्तो ब्राह्मणो बभूव। सोऽप्यनपत्यः दुःखश्च॥ तस्य शिवमाराधयतः शिवालये शिव
आत्मानं दर्शयामास। वरं ब्रूहि प्रसन्नोऽस्मीत्युवाच। पुत्रं मे देहीति ब्राह्मणस्तमब्रवीत्। पुनं शिवेनो
क्तं। पुत्रादन्यं वरं वरय। पुनस्तेनोक्तं पुत्रं मे देहि। तदनंतरं श्रुत्वा पुनः शिवेनोक्तं। एको द्वादशवर्षायुः
अपरः पंचा धिकशतवर्षायुः तयोर्मध्ये पुत्रमेकं वृणु। द्वादशवर्षायुः सर्वगुणसंपन्नो भ
विष्यति। तदितरो महाजडो भविष्यति। ब्राह्मणोऽब्रवीत्। देव तावत् स्वकांतयापि पत्नीं पृष्टैष्यामि॥
शिवेनोक्तं हे द्विज गच्छ। स्थितोऽस्मि। ततो गृहं गत्वा पत्नीं पृष्ट्वा समायातः। आह च देव सर्वगुण
संपन्नं पुत्रं मे देहि। शिवोऽब्रवीत् अहमेवास्य पुत्रो भविष्यामि। ततो गौर्यब्रवीत्। तव सेवाधर्म

हमवतरिष्यामि।। ततस्तद्ब्राह्मणपत्नी गर्भं दधार। गर्भधारणादनु मासेषु पूर्णेषु पुत्रंज
नयामास। शंकरदानत्वात् पिता तस्य शंकर इति नाम चकार। ततः शुक्लपक्षोडुप इव
ववृधे।। संस्कारक्रमेणोपनयनमवाप्य गुरोः सकाशान्निगदमात्रेण वेदान् सांगानधीतवा
न्। शास्त्राणि च स्वयमेव ज्ञातवान् जन्मदिनामासात्कविरभूत्। क्वचित् शक्तिं स्तौति। क्वचि
त् शिवं च। विष्णुमपि क्वचित्। तावद्देवताः साक्षाद्भूत्वा वरान् ददुः। अणिमादयः सिद्धयः
तद्वशेऽभवन्। कस्यचिद्ब्राह्मणस्य गृहे वनीपाणिगौरी तेन विधिवद्विवाहिता। गृहस्थेन ते
नैव निष्कोधर्मः प्रवर्तितः। त्रियैश्वर्यव्रजेषु सत्पत्नीकां च विस्तारितं।। त्रिकालज्ञान
बलात्।। सर्वोऽपि मनुष्यलोकस्तद्वाक्ये स्थितः। ततस्तस्य जन्मत एकादशवर्षाणि पती
तानि।। प्राप्ते द्वादशमे वर्षे पितरं प्राह हे पितः अस्मिन्नेव वर्षे किमप्यनिष्टं भावि। अ ।।१४
तः काश्यां यास्यामि। ततः पत्न्या सह तेनोक्तं। आवामप्यायास्यावः। ततः शंकराचा

र्यः सर्वान् शिबिकास्वारोप्य पन्था गदकाश्यपं जगाम। यदा काशीमध्यं प्रविष्टस्तदा काल
ज्वरः समजनि। ततो मणिकर्णिकायां स्नात्वा चार्धपद्येन स्वेच्छया प्राणानुत्ससर्जी। तदर्ध
पद्यं यथा। निमज्जतां नाथ भवार्णवान्तश्चिराय मे पोतइवासि लब्धः। तदनु तालितरो
महद्दुःखान्वितौ विलेपतुः। तत्परिवेदनं श्रुत्वा गोपेयसंजाता दयान्विता सीत्। पद्योत्तरार्ध
मोप्यपि पठितं। तद्यथा। त्वया पिलब्धं भगवन्निदानीमनुत्तमं पात्रमिदं दयायाः। तच्छ्रुत्वा ध
रांकरो जीवितमवाप। पन्नो। ब्रह्म ब्रवीत्। त्वया कथं मम जीवितुं प्रार्थितः जीवितोऽत्र हि जिष्या
मि। ततस्तेन संन्यस्तं। कुटीचरबहूदकहंसपरमहंस इति चतुर्धा संन्यासः। मदिराममत्तव।
त्कर इति यातत् तेन वस्त्रं स्थितं न ज्ञायते। यावत्तावत् शिखासूत्रे न त्याज्ये। कषायवस्त्रमपि न
कार्यं। इति श्रुतो संन्यासधर्मः पृष्टिताः याचन् शिखासूत्रे तावत् वेदवान् पुरुषः। शिखासूत्र
त्रयोस्त्यक्तयो वेदोपि त्यक्त एव। वेदे त्यक्ते श्रीनारायणस्त्यक्त एव। पश्चात्तापं ओ भवति॥ ध

श्राउरुषोत्तमेनजनानन्मद्विमुखानकरु। इतिशिवंप्रत्युक्तं। तदेवावतारप्रयोजनंमत्वा
शिषास्तत्रैपरित्यज्य काषायंवासःपरिगृह्य एकदंडीबभूव। तदनुतच्छिष्या अतिशिष्यत्वेन
बहवोभवन्। यथोक्तं। भगवद्गीतासु। यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः। सयत्प्रमाणंकु
रुतेलोकस्तदनुवर्त्तते। ३। तदनु अथातोब्रह्मजिज्ञासेत्यादिव्याससूत्राणि उत्तरमीमांसा १४
कर्ट्वे व्याख्यातानि। अत्रपथविचारे मायावाद तत्ववादौ अनाद्यौस्तः। मायेत्यसुरारतिश्रुतत्क
त्वात्। मायावादिमतमासुरमेव। यत्रज्ञानेश्वर सांख्ययोगवे[illegible]तज्ज्ञानंप्रतिष्ठितं। महात्मनिस्तु दा
मांपाद्येतिभगवदुक्तं। तत्ववादिमतं। एतस्मिन्नंतरे गूर्जरदेशे अणहिल्लपत्तननामधेये कश्चिद्राजा
बभूव। तस्यात्मजःकुमारपालनामासीत्। तंकश्चिज्जैनःश्वेतांबरो हेमसूरिनामापाठयतिस्म
एकदातेनराजकुमारेण रात्रेश्चतुर्थयामे संपूर्णं चंद्रमंडलं गलितमिति स्वप्नेदृष्टं॥ जिनशाला
मागत्यप्रबुद्धेन पाठकः पृष्टः। संप्रति मयेदृशःस्वप्नोदृष्टः। इतितत्श्रुत्वा हेमसूरिणा दुर्वचोजि ॥

रसौ रोषं प्रापितः। ततो रुष्टः कुमारः स्वगृहं गतः। पश्चान्निद्रां न लब्धवान् राजपुत्रेण ततो मनसि विचा
रितं उदिते सवितर्येनं हनिष्यामि। यन्मां निरपराधं दुर्वचोभिराक्षिप्तवान्। ततो हेमसूरिणा स्वशिष्यं
प्रेषयित्वा संमानितः इति पृष्टश्च। नो राजपुत्र यत्स्वप्ने त्वया दृष्टं तेन सप्तमे दिवसे तव राज्यं न विष्यति
यदि स्वप्नदर्शनादनु निद्रा याति तर्हि स्वप्नो निष्फलो भवति। अतो मया रोषितोसि। यदि तव राज्यं न भवि
ष्यति तर्हि मदाज्ञावशगेन त्वया न भाव्यं॥ न विष्यामीति राजपुत्रः प्रतिजज्ञे। ततो गुर्जरदेशेशः कालधर्म
मवाप। कुमारपालो राजा बभूव॥ ततो हेमसूरि[illegible]वचनात् स्वदेशमध्ये मीमांसक वैष्णव पाशुपत सां
ख्य योग वेदांत संज्ञानि वेदमूला निषद्दर्शनानि नाशं निनाय। एतस्मिन्नंतरे श्रीर्यस्यांशो देवप्रबोध स्त
नामा गौडे प्रादुर्बभूव। श्रीलक्ष्मद्वैपायनशिष्यो जेमानिरिति तस्यांशो भट्टाचार्यो बभूव। तास्यां काश्या
मागतं तास्यां श्रुतं जैनपाखंडेन गुर्जरदेशे नाशितो वैदिको धर्मः। ततस्तावुभावपि जैनमंवेषं विधाय
गुर्जरदेशं समायातौ हेमसूरिणा स्वाश्रयं प्राप्तोदृष्टौ। दृष्टौ च कौ युवामिति तावूचतुः॥ आवां जैन
दीक्षाकामुकौ तवांतिकमायातौ॥ हेमसूरिणा हा युवां वर्षं यावत्तीक्षां पारिक्षां त्वा शिष्यौ

करिष्यामि। ततो वर्ष[illegible] यावत् ताभ्यां हेमसूरि सेवा कृता। उत्पादितो विश्वासः। ततः एकदा हेमसूरि
णा स्वेष्टदेवता पद्मावती शक्तिर्निशि समाराध्यते। तस्याश्चाराधनकाले तावपि मध्ये नीतौ। यथा कोपि
न जानाति। तथा मदिरापानं कर्तुमारब्धं। ताभ्यां मदिरा दत्ता। देवप्रबोधेन न याता पीता। महेन भ्रातीद्धधं
इत्यकर्त्तं॥ तत्पानादनु हेमसूरिणा वेद देव ब्राह्मणयज्ञनिंदनमारब्धं। तच्छ्रुत्वा महाचार्यनेत्रयोरश्रुबिंदवः
पेतुः॥ तद्दृष्ट्वा ब्राह्मणोयमिति हेमसूरिरुवाच। अहिंसैव जैनशासने मुख्या। अतो नायं हंतव्यः। उप
रितनभूमौ रक्षणीयः। यत्रासौ रक्षितस्तत्र तस्य पुस्तकसंग्रह आसीत्। तत्पुस्तकाभ्यासो कृतः।
महेन ज्ञातं। जैनमंत्रैरनेन राजा वशीकृतः। राज्ञः गृहसमीपे हेमसूरिवसतिरासीत्। तस्य राज्ञः
का विज्ञाज्ञी जैनधर्मपरांङ्मुखी वर्त्तते स्म। सा नित्यं शालिग्राममावं[illegible]त्वा भुंक्ते स्म। तया निशि एकदा पद्यं
पठितं॥ किं करोमि क्व गच्छामि को वेदानुद्धरिष्यति॥ तच्छ्रुत्वा महाचार्येणोत्तरार्धं पठितं। मा विषीद व
रारोहे भद्राचार्योस्मिन् भूतले॥ एवमुक्त्वा तस्मादधः पतितः। यदि वेदाः प्रमाणं स्यात्। तर्हि पतने ॥१५॥
मृत्युर्मास्तु॥ यदीति संदेहवचनेन एकमक्षि विनिर्गतं। तत्रापि यथा कोन जानाति तथा पतनेहर्निशं

वसारः॥ एकदा कस्मिंश्चिदारामे रहसि उत्पलमिवृन्दो दृष्टः। ततस्तत्रास्थितः। ततः सायंकाले पुष्पव
णिक् समायातः स उत्पलसीपत्रं गृहीत्वा पुनः सुपिहितं कृत्वा जिगमिषुरासीत् तदा नृपेण गृहीतः।
आह त्वा नो मालाकारये जैनानां धर्ममाचरति स सङ्कटं बो राज्ञा हे नृपते॥ तत्कथय कस्यार्पयितु
मासीत्। रुः पुष्पवणिक् आह॥ जैनेद्रये वमुख्या। त्वमपि जैनोसि अहो राजकुमार। लेन नीवेदनीयं। नृप आ
हासत्वं वदको पि वैसवो स्ति। सशपथं न कथयिष्यामि। पुष्पवणिक् आह। अस्ति राज्ञी का। नृप आह
मदीयं लिखितपत्रं तव मायहि स्तेन तस्मै देयं॥ दास्यामीति मालाकार आह॥ ततः किंकरो मीतिश्लोकं लि
या खित्वा प्रेषितवान्। राज्या पितं दृष्ट्वा तमाकारमास॥ ततो यो जैनं वेषं कृत्वा राज्ञी गृहे गतः। अन्य
था गंतुमशक्यत्वात्। मध्ये गत्वा ब्राह्मणवेषं त्यक्त्वा त्मानं दर्शयामास॥ ततो राज्ञी धर्मतः तं समयपा
मास॥ ततो नृपस्तत्र कृहे लक्षितो वासीत्॥ पश्चाद्यादृशोंगदः हेमलरिणा जैनवशीकरणमंत्रेः
॥ कृत्वा राज्ञो बाहौ बद्धस्ता [illegible] दृशांगदं [illegible] कारयित्वा राज्ञी हर्नराज्ञो बाहौ बद्धः जैनलतोगृ
स्ते

ष्ठितः ॥ ततो वेदिकानिवारतो राज्ञः कालज्वरः समजनि । तद्देवेर्देवसूरिः पृष्टः । कथं विज्वरो
न्नविष्यामीति हेमसूरिणा । दत्ते कालपुरुषदाने विज्वरो भविष्यसीति । ततः कालपु
रुषं निर्माय कमपि ब्राह्मणं बटुकं ज्ञात्वा यज्ञोपवीतादि धारयित्वा गायत्रीमंत्रं कथयित्वा त
स्मै कालपुरुषदानं दापितं ॥ दत्ते दाने राजा विज्वरो बभूव ॥ ततो राज्ञो मनसि विचारः समज
नि ॥ न ब्राह्मणसमं किंचिदस्ति ॥ येभ्यो दाने दत्ते विज्वरोऽहमासं । ततः पुनर्देवप्रबोधाचार्यः
ज्ञातप्रायश्चित्तः श्रीसिंहं प्रसाद्य पत्तनपुरं समायातः । बहुभिः शिष्यैः शिबिकारूढः तैः स
रस्वतीरिपाकक्रियाकर्तुमारब्धा । तदा हेमसूरिशिष्यैः समागत्य यथाऽन्नमपक्वं न वर्तित तथा मं
त्रविधिया कृतं । राज्ञी गृहस्तात्तन्न द्वाचार्योपि देवप्रबोधाचार्यः समायातः । कुशलादि पृष्टं । ततो न
द्वाचार्येण नालिकेरीफलान्यानि मंत्रप्रक्षेपणैः प्रक्षिप्तानि विघ्नेरितानि । जैनानां शिरःसु युगपत् ॥११॥
पेतुः ॥ तैर्हन्यमानैः समेत्य तेषां पाके स्वमंत्राचारो दूरीकृतः ॥ ततो द्वितीयदिवसे कुनाङ्किकाः

सर्वेब्राह्मणा राजसभां जग्मुः ॥ तानागतान्विलोक्य राज्ञा प्रणामादि सत्कृतिः कृता ॥ तद्दृष्ट्वा हेम
सूरिश्चकितो बभूव । अपोऽपि विदा ब्राह्मणेन पंचांगतिथ्यादि श्रावितं । स्मार्तैर्निकृष्यित मद्य श्रा
द्धं करणीयमिति । तच्छ्रुत्वा हेमसूरि राह । अद्य अपोऽर्णमास्यां भवेत्तर्हि सशिष्योऽहं शतहस्तनिम्न
गर्त्ते सशिष्य पुस्तकोऽहं प्रविशामि । तथ्यं त्वमिति ब्राह्मणैरंगीकृतं । ततो हेमसूरिणा स्वेष्टदेव
तां प्रभावतां स्मृत्वा तस्याः कुंडलं प्रार्थयित्वा निशामुखे गगने चंद्रबिंबवत्प्रकाशितं । तत्तद्दृष्ट्वा
सर्वेजनाः पौर्णमासीमिति रे । ततो देवप्रबोधाचार्येण स्वेष्टदेवतान्तसिंहदत्तबनेन तत्र शक्तिकुंड
लं कर्णकुंडलं विज्ञाय राज्ञो निवेदितं ॥ द्वादशयोजनावधिः प्रकाशोऽस्य नाधिकः । तद्राज्ञो । वि
लोकितेन तथैव जातं । ततो हेमसूरिणा विचार्य गर्त्ते प्रवेष्टुमारब्धं । ततो गर्त्ते सलस्थे हेम
सूरौ सर्वैर्जनैः समेत्य धर्मस्य तत्त्वं पृष्टं । तेन वक्ष्यमाणमिदमुक्तमिति । हरिर्नागीरथ्यौ
विप्रा विप्रा नागीरथ्यौ हरिः । नागीरथ्यो हरिर्विप्राः सारमेतज्जगत्त्रये ॥ इत्युक्तेऽम्ब

द्रिगर्त्तैः स्मरितः। ततो येस्मर्वे येनानादेशेभ्योगता ब्राह्मणादयस्ते उन्नतः समागताः ततो वर्णा
श्रमलक्षणो धर्मः समावर्त्तितः। गुर्जरदेशे वेदाः प्रवृत्ताः॥ सर्वज्ञात्वोवेसावशैवदर्शनोन्नप्र
वृत्तोनंदाचार्यस्य मीमांसकत्वात् मायावा[illegible]दिवेदांतस्यापि प्रवृत्तिर्न्नभवत्॥ यदानंदा
चार्यैर्ज्ञातं ऊंडलमिदं पद्मावत्याश्चंद्रबिंबायितं तदा पद्मावतीसरस्वत्येव। साशाप्ता न्नूमा
वतरेति॥ सानंदाचार्यस्य सुतान्नत। ब्राह्मणो रा॰ सुरेश्वरनामा कश्चित् नंदस्यांतेवासी।
आसीत्॥ सा तस्मै पत्नी वितन्ना। तया सार्द्धमिसौ नंदमतानुसारेणाग्रहाश्रमो। वितक
र्णएवत्वहं चकार॥ काश्यां तद्वसतिरभूत्॥ ततो नंदैः स्वमनसि विचारितं। मया गुर्जरदे
शे वेदमार्गस्थापनाय जैनशास्त्राण्युक्तानि। पाखंडशास्त्राद्वलोकने ग्निप्रवेश ११८
इति नियमः ततः प्रयागे समेत्य अग्नौ प्रवेष्टुमारब्धं। तदा तत्र शंकराचार्यः समायातः॥

विवदिष्णुरहमस्मी त्युवाच ।। तदानन्दैरुक्तं । त्वयाकाश्यां गंतव्यं । तत्र ममजामातास्ति वि
वादं करिष्यतिश्रुति । अहमग्नौ प्रवेक्ष्यामि । ततः शंकरः काश्यांगतः । सुरेश्वरनन्दैः सार्द्धं वि
वादं चकार । सा मध्यस्था तस्मै वक्तृता । शंकरः पराजयं प्राप्तः पुनर्गृहस्थो न भवति । सुरेश्वरः
पराजित एकदंडी भवतीति पणः कृतः । नन्दमतखंडने शापदानमेर त्वात् । ततः शंकरो गोकर्ण
रख्यं शिवक्षेत्रं दक्षिणस्यां जगाम । तत्र गत्वा शिष्यचतुष्टयं प्रत्युवाच । वत्सस्त्रसुदिदुमुखवानारूढै
र्नवद्भिर्गत्वा सर्वत्र मायावादि सिद्धांतं स्थापनीयं । संन्यासः शिखासूत्रपरित्यागे एकदंडेनैव ।।
इति रात्रौ शिष्याणामाज्ञा दत्ता । तैराज्ञा शिरसि धृता । प्रातः प्रयाणं भावि । तेषां मध्ये एको मधुना
मा भवत् । सोपि शंकराद्गृहीत संन्यासः तस्य स्वनाम रामचंद्रः प्रोक्तं बभूव । नाम्ना माधव । माधोत्वया
शंकरवचनेन स्थातव्यं ।। यतो भवान् हनुमदंशः तवैव संप्रदाय प्रवृत्तये भवतीर्णः । शंकरस्त
त्वमासस्तत्र नाथ्यपुत्तर मीमांसकच्छेदणांग्रवपिद्धीनित्यपत त्वबादि सिद्धांतानुसारेण पुनर्व्यास

सूत्राणि व्याकुरु॥ तत्त्ववादि सिद्धांतं स्वयमुपदिष्टं। ततोसौ शंकरदर्शिनि मार्गे विष्णुस्वामी
नाम वंशद्दर्शितमार्गेण वैष्णवसंप्रदायं प्रवर्त्तयामास॥ शंकरमते तत्संप्रदायिना मध्वा वि
विरोधः॥ इति समासतो मध्वाचार्यसंप्रदायोत्पत्तिः॥ बिल्वमंगल [illegible] तः पश्चात् मध्वा
चार्यतिरूर्ध्वं शाखि उ कश्चिद्रामानुज इति ब्राह्मणो बभूव तस्य पत्नी दंपती समाराधयतो लक्ष्मीः प्रसं
न्नाभवत्॥ वत्स वरं ब्रूहि इत्युवाच। तेनोक्तं देवि त्वं गर्भमेहि। ततस्तया गरुड श्रा ... शः ततो गरु
डेन तस्मै नारायणीयं सिद्धांतं समर्पितं। तस्मात्संप्रदायः प्रवर्त्तते॥ ते श्रीवैष्णवाः अद्यापि दक्षिण
स्यां दिशि प्रसिद्धाः तस्मिन्नेव संप्रदाये केचिद्धरिहरोपासकाः अगस्त्य परशुरामहनूमतां आवेशा
वाः श्रूयंते॥ इति रामानुजसंप्रदायोत्पत्तिः॥ अस्ति दक्षिणापथे पांडुरपुरं नाम नगरं। तत्र श्री
विठ्ठलो स्वयं भगवत्स्वरूपं। तस्मिन् पुरे कश्चित् निंबादित्य नामा ब्राह्मणो बभूव। तस्मै श्री विठ्ठ ११९
लेन स्वसिद्धांतमुपदिष्टं। ततः सोपि तत्सिद्धांतानुसारेण स्वसंप्रदायं प्रवर्त्तयामास॥ एवं श्रीमु वि

स्वामी रामानुज मध्वाचार्य निंबादित्याश्चत्वारः संप्रदायप्रवर्त्तका दाक्षिणात्याः । उपनिषद्गीताभ
गवत्व्याससूत्राणां भाष्यं चतुर्भिः स्वस्वसिद्धांतानुरोधेन कृतमस्ति । निबंधश्च पृथक् पृथक् चतुर्षु संप्र
दायेषु स्वस्वाचार्यकृतो निबंधो वर्त्तते । एवाक्यतो नित्यनिरसानैमित्तिकभक्तिकार्येषु स्वे स्वे संप्र
व४ दाये प्रवृत्तिः । यथोक्तं पद्मपुराणे । चत्वारस्ते कलौ भाव्याः संप्रदायप्रवर्त्तकाः ॥ उत्पत्स्यंति प्रसिद्धा
स्तत्र तु कलौ पुरुषोत्तमात् ॥ तद्यथा ॥ एकदा मध्वाचार्यैः श्रीपुरुषोत्तमायतनं जगाम । योऽत्र भगवत्से
वका ब्राह्मणास्तान् प्रत्युवाच । यूयमदीक्षिताः भवंतु अदीक्षितैः भगवत्सेवा न कार्या । इति तद्
टि त्तैरुक्तं ॥ श्रीजगन्नाथस्याज्ञया दीक्षां गृहीष्यामः । तदा श्रीजगन्नाथेन मध्वाचार्यं प्रत्युक्तं सर्वे
षां मदीयानां त्वं दीक्षितान् करोषि । एते दीक्षिता एव । मध्वाचार्यो भगवंतं प्रत्याह । अदीक्षित
स्य वृथा मोक्षं तत्सर्वं निरर्थकं । पशुयोनिमवाप्नोति दीक्षाहीनो मृतो नरः ॥ इति शास्त्रे कथ
नं कृतं । भगवानाह ॥ एतत्कैवात्पन्न दीक्षिता एव वैष्णवाः । अत्र मदिच्छयैव प्रधानाः । मध्वा

पवन्नष

चार्यश्चाद्यः केवैष्णवाः केअवैष्णवाः इतिमयाकथंज्ञायते। भगवानाह॥ येप्रदयांतःपातिनस्तेवैष्णवाः। मध्वाचार्यश्चाह। तेकेसंप्रदायाः पुनर्भगवानाह॥ विष्णुस्वामी॥ रामानुजः॥२॥ मध्वाचार्यः॥३॥ निंबादित्यः॥४॥ एतेषां संप्रदायेयेतेवैष्णवाः इतिश्रीजगन्नाथवाक्यान्।क लौसंप्रदायाश्चत्वारः प्रसिद्धाः चत्वारउपसंप्रदायाः। चैतन्य॥१॥ स्वरूप॥२॥ प्रकाश॥३ नंद॥४ इतिविष्णुस्वामिनउपसंप्रदायश्चैतन्यः रामानुजस्य॥ नंदः मध्वाचार्यस्य। प्रकाशः निंबादित्यस्य स्वरूप इति वामाः। स्वरूपप्रकाशौ विछिन्नौ कालेन एषु वर्तमानेषु आचार्याणां तत् शास्त्र व्याख्यानिबंधादिनवर्त्तते। एषुसकलसंप्रदायांतःपातिनएव। परं सर्वाचार्यसिद्धांततो वैलक्षण्येन स्वस्वविचित्रनादयः संप्रदायाः दृश्यन्ते। गरीयसा केवलमीश्वरेच्छा। अत्रसंप्रदाया दिषु को विचारः॥ ॥इतिश्रीसंप्रदायप्रदीपे विष्णुस्वामिस्नेहपात्रबिल्वमंगलावतीर्णश्रीवल्लभनंदप्रदीपे सर्वसंप्रदायोत्पत्तिप्रकरणं तृतीयं॥ ॥३॥ ॥श्रीवल्लभोयादिमर्दीयहृदीश्वरो

दा

विष्णुस्वाम
चैतन्य १
रामानुज
नंदः २
मध्वाचार्य
प्रकाश ३
निंबादित
स्वरूप

सं

॥२०॥

य

स्तिश्रागोपिकाद्वद्दंपल्वलराजहंसः।सत्येनतेनममवाचितदीयवृत्तंसर्वंप्रकाशमुपयातुयथा
र्थतोत्र॥१॥अस्तिदक्षिणापथेतिलिंगाभिधोजनपदः।यत्रब्राह्मणाःकलिं परान्नूयवैदिकध
र्ममनुतिष्ठंति।यत्राग्निहोत्रयज्ञ३उष्णहविंबिंहूयमानेधूमांधकाराछादितदृष्टिःकलिर्दूरतः
पलायते।यत्राद्यापिवेदाःसवीर्यावर्त्तंते।तत्रसकलब्राह्मणगणालंकृतश्रीमल्लक्ष्मणानंदक
लकमलविकाशमार्त्तंडश्रीवल्लभाचार्यःप्रादुर्बभूव।अहोकालिद्दैरतरंगतोप्युनाधर्मोपिसं
वृद्धिमितश्चवैदिकः।मन्निंहरेःसम्प्रापवर्न्नितीतिवैवा।काशवाएपाहमदीयतन्मानि।एकदाति
लंगदेशात्श्रीलक्ष्मणदीक्षितैःकाश्यांसमागतं।ततःश्राश्रमक्रमेणगृहाश्रमममवाप्यप
योत्यंगार्हस्थ्यंपालयामास।एतस्मिन्नंतरेधर्मपत्नीम्नताधननादिसंस्कारार्थंगर्भंदधार।
तद्दिनादारभ्यसप्तमेमासिम्लेच्छकाश्यांपरचक्रमाजगाम।तत्रयातुसकलमपिपुरंपला
यितं।तदातत्पत्न्याःपलायंत्याःपृथिमार्गावनेसप्तमासीयोगर्भःविश्रांसितः।ततोमाहा
तरुतलेतरुपत्राण्यास्तीर्यतत्रश्रामगर्भंमुक्ता३अत्राप्युत्तलयस्रदेशांगता।ततःकाश्याःसका

शांत परचक्रं निवृत्तं॥ सम्यक् स्वास्थ्यं जातं। तदा लक्ष्मणभट्टदीक्षितपत्नी कार्त्रीप्रत्याया।
ती यत्र गर्भो मुक्तस्तत्रायाता तस्मिन्स्थाने। प्रत्युवाच लक्ष्मणं सर्वं तिष्ठत पश्यामि। मयात्र गर्भो मुक्तः तस्य
कीदृशो वृत्तांतः इत्युक्त्वा भर्त्रा साधीं दिदृक्षुः प्रस्थिता। यावत्तत्स्थलं तौ दंपती आगतौ तावन्महा।
ज्वालाग्निविराजितं तत्राग्निकुंडं ददृशतुः॥ आह तत्पत्नी अहो महच्चित्रमिदं। लक्ष्मणनाथ पत्रामगर्भो मु
म: क्तः तत्राग्निः प्रज्वलन्निव दृश्यते। अतः अमानुषोयं गर्भः जीवन्निह तिष्ठति। अथैनं नीत्वा गृहं
यास्याव इत्युक्त्वा गर्भं नीत्वा गृहं प्रस्थितो। गृहं समागम्य मुहूर्ते ध्यानं दृष्ट्वा गर्भं पालयामास
॥ तदनु सांगो गर्भो ववृधे। ततः स्वकुलदेशीयद्वारा सर्ववल्लभत्वात् पिता वल्लभ इति ना
म चकार॥ एवं क्रमेण गर्भाष्टमे वर्षे जाते कृतोपनयनो वेदमधीतवान्॥ तदा तस्य मातृप्रीत्यज्ञा
दृष्ट्वा लक्ष्मणभट्टः स्वहृदि विचारितं अहो संप्रति कलिकालः पुत्रोयं मे महानुभावः कोयम
वतीर्ण इति स्वहृदि न वेद्मि। इति संचिंत्याग्निहोत्रशालायां नमो नारायणं चकार। तदा रात्रेः पश्चिमे ॥२४॥
यामे श्रीमहानंदमात्र करपादमुखोदरादि भगवतः श्रीपुरुषोत्तमस्य मुखमेवाग्निविग्रहरू
तसौ

पत्स्वप्ने प्रादुर्बभूव ॥ आह च ॥ अहमग्निर्भगवदाज्ञया तव पुत्रतां गतः । तदनुभावेन निःसंदेहो भव ।
इत्युक्त्वाग्निरंतर्हितः । तत्स्वप्नवृत्तांतं लक्ष्मणभट्टैः स्वपत्नीं प्रत्यवादि ॥ तदनु कियति काले गते स
ति लक्ष्मणदीक्षिताः कालधर्ममवापुः ॥ ततस्तत्पारलौकिकं पारयित्वा ॥ क्रमेण सांगान्वेदान
धीत्य सर्वशास्त्राणि अधीतवान् ॥ श्री पाणिनीव्याख्यां समाप्य व्याससूत्र जैमिनिसूत्र गौतम
काणादकपिलपातंजलिसूत्रव्याख्यां समाप्य पौरुषेयीं सगामवलोक्य नाति प्रसन्नमना
बभूव ॥ ततः श्रीवल्लभो वैष्णव तंत्र शैव तंत्र प्राभाकर कौमारिल भोजयामतादिशा[illegible]स्त्रा
णि विष्णुस्वामि रामानुज मध्वाचार्य निंबादित्य प्रोक्त श्रुत्यादिभाष्य । सिद्धांतं परिहाय काश्यां
तेषां मध्ये हतिं दक्षादक्षिणपथे तत्र हतिं श्रुत्वा दक्षिणपथं प्रवृत्तः । प्रस्थितः । तत्र गत्वा तानि सर्वा
णि वल्लोक्य । विद्यानगरं समायातः । तदा तत्र लक्ष्मनामा राजा वर्तते । तत्र मध्वाचार्यमार्गगति
मिरतः शानप्रदीपः श्रीव्यासतीर्थनामा यती वर्तते । मायावादी गजानीकनाशने सिंहविक्र

मः॥ तस्माद्दे पायनो व्यासो नामा सतीर्थ्यः कलौ युगे॥ तदा राजसभायां मायावादि॰ तत्त्ववादिनो वि
वर्द्धमानयोः षड्हानि सप्त तानि॥ तदा श्रीवर्द्धनेन श्रुतं॥ राजसभायां विद्याविवादोस्ति॥ ततश्चोत्का पन्न
राजसभायां आस्थितः॥ तस्मिन् विवादे मायावादिना तत्त्ववादी जितः तदा श्रीवर्द्धनोऽब्रवीत् रे मा
यावादिन् मयि जिते जितं॥ मायावाद्याह॥ त्वम् पेहि॥ श्रीवर्द्धनेन सह तस्य वादः समजनि॥ श्रीवर्द्धने
नाप्रयासेन मायावादी जितः॥ तत्र राजप्रसादं कृत्वा पूर्वं विवद मानयोः रूप्ययोर्द्वा यथेच्छया अत्र स्था
तुमारेभे॥ तच्छ्रुत्वा व्याससतीर्थ्यैः समागत्य स्वशिष्येण राज्ञा सह श्री वर्द्धनगोत्रनामादिकं लात्वा प्र
र्पितं॥ अत्र च वृद्धिं कियत्कालं स्थातव्यं॥ अयं राजा तुलापुरुषदानं करिष्यमाणोस्ति तत्र च वृद्धिरा
चार्यैर्गन्तव्यं॥ ततः कियत्कालं श्रीवर्द्धनेन स्थितं॥ तत्कर्म कारयित्वा तुलादानसुवर्णं गृहीत्वा अर्द्धद्रव्ये
णारत्नरवचितमेखलां कारयित्वा तत्रस्थश्रीविट्ठलारव्यस्य भगवतः समर्पिता॥ अर्धद्रव्यस्यार्धेन श्वेत ॥२२॥
करणं दत्तवान्॥ तदुपर्यांशो वर्त्तमानोग्रे गादीस्थैर्यत् क्रियायां न विष्यति॥ तत्र व्याससतीर्थैः श्रीवर्द्ध

मानुजावमलौकिकमवलोक्यमनसिविचारितं।यद्ययमस्मत्संप्रदायीभवतितर्ह्यस्मन्मार्गरक्षासम
र्थोभवेत्।तदातस्मैसन्यासंदत्वास्वमार्गदीक्षांदत्वाचार्यपदवीमभिषेचयिष्यामि।एतस्मिं
नंतरेश्रीविष्णुस्वामिसंप्रदायीद्राविडदेशीयोबिल्वमंगलःश्रीवल्लभस्यचित्रेस्वात्मानंदर्शयामास॥
आहचाहंत्वयाव्यासशिष्येणभाव्यं।अहंभगवतःश्रीदिव्यकोशोद्धरणार्थंश्रीकृष्णस्यवाक्यात्त्वद्दर्शना
कांक्षयातिरोभूयस्थितोस्मि।तयास्थित्यासप्तशतवर्षाण्यतीतानि।श्रीविष्णुस्वाम्यनंतरंअस्मन्मा
र्गेसिद्धशताभ्याचार्यबिभुवःचरमोहं।यदाभगवदाज्ञयाश्रीमहादेवांशेनशंकराचार्येणभगवन्मार्गा
त्सर्वोपिजनोपिक्त्ताभितःतदामयापिश्रीकृष्णंप्रत्युक्तंनयमांनिजान्तिकपार्श्वमिति।तदाभगवतोक्तं
भविष्यत्यस्मिन्युगेमन्मुखावतारोवल्लभनामा।तस्मिन्नदृश्यविशेषजीवानांबहिर्मुखत्वंकेवलंभ
क्तिमार्गेऽगीकरिष्यामि।विष्णुस्वामिमतंसर्वतस्मैप्रोक्त्वापश्चात्तत्समीपंत्वमायास्यसि॥रामानुजमार्गी
यास्तुसृष्टिःपाद्मकल्पीया।मध्वाचार्यमार्गीयास्तुसृष्टिःश्वेतकल्पीया।निंबादित्यमार्गीयास्तुसृष्टिःसौरकल्पी

म

या। विष्णुस्वामिमार्गीयास्तु हि सारस्वतकल्पिया। पद्मोक्तसिद्धांतं॥ रामानुजीयानां लक्ष्मी॥ रुद्रादयोप्पा
वायाः। वायुहनुमान्भीमसेनादयोवतार मध्वाचार्यमार्गीयानां नारद रामायणं सिद्धांतं श्रीभगवद्गीता श्रीभ
गवतोक्तं सिद्धांतं। विष्णुस्वामिमार्गीयाणां श्रीसूर्यमंडलस्थहिरण्मयपुरुषोक्तं अत्यादीनां सिद्धांतं॥ नि
म्बादित्यमार्गीयाणां तदेवोपास्यरूपं। श्रीलक्ष्मीनारायणो रामानुजीयानां मुपास्यरूपो। श्रीरामचंद्रस्तत्त्व
वादिनां श्रीरामचंद्रः॥ विष्णुस्वामिमार्गीयाणां अकवागमतानुसारेण तु श्रीगोपीजनवल्लभ एव॥ अत्राग्निराचार्यै
भगवन्मुखं। नारदीयपंचरात्रवैषानसादावुक्तविधिनादीक्षाश्रया। दिसंप्रदायत्रये। श्रीविष्णुस्वामिमार्गे
आत्मनिवेदनपूर्वकमेव भक्तिमार्गः। संप्रत्यस्मिन्मार्गीयाः अपि शंकरमायया भ्रांताः अस्मिन्विद्यानग
रे श्रीविठ्ठलस्वरूपदर्शनेच्छमोस्ति। असावेव भगवतामात्मसमर्पणां करिष्यति। ततो विष्णुस्वामीमार्गः
प्रकाशनीयः। इत्युक्ते श्रीवल्लभैः प्रबुद्धं। ततः प्रभाते श्रीवल्लभेन व्यासतीर्थस्याग्रे कथितं सर्वं वृत्तांतं। तच्छुत्वा
व्यासतीर्थैरुक्तं तत्त्वं स्वसिद्धांतं मह्यमुपदिश। श्रीवल्लभेनोक्तं। नेदमहमुपदेष्टुं कामः। एतस्मिन्नंतरे उ ॥२३॥
भयोः रपि आत्मनिवेदनं विठ्ठलनाथेन स्वप्नेकारितं। श्रीवल्लभं प्रति श्रीविठ्ठलनाथेनोक्तं। भवद्भिः वि

सं ३

ष्णुस्वामिमार्गी कर्त्तव्यः। विष्णुस्वामिकृतकृतिव्यासस्तत्र गीताभागवतभाष्ये निबंधादिकालेनां
तर्हितं॥ अतोनवद्भिः कृष्णद्वैपायनोद्धवबिल्वमंगलादिवर्त्तनं निशम्य पुनः कृत्वा दीनांभाष्यं श्रीकृष्णवि
ष्णुस्वाम्यभिप्रायेणारचनीयं॥ ततोग्निर्वागीश्वरः स्वमनासि मार्गेयं तावत्स्थास्यति। यावद्भंगाप्रगटज
न्मायावज्जोवर्धनोगिरिः तावदयंमार्गः। स्वान्वयस्थस्थास्यति॥ कलौन भविष्यति। इत्यभि
क्रांतर्हितः॥ ततस्तस्मात्स्थितं। पुनः प्रयागे साक्षाद्बिल्वमंगलदर्शनं समजनि। बिल्वमंगलेनश्री
वल्लभं प्रत्युक्तं। अधुनावद्भिः काश्यांगंतव्यं। सर्वोपि निषद्गीताव्यासस्तत्रभागवतभाष्यान्यवलो
कनीयानि॥ संप्रतिकलिकाले सर्वशास्त्रापोमायावादिभिर्विपरीततया प्रतिपादितोस्ति॥ तद्दर्शि
व नेब्रह्मवादिविरोधात्मनस्सिखेदेजाते बदर्याश्रमंगंतव्यं तत्र साक्षात्कृष्णद्वैपायनदर्शनं भवि
रा ३ ष्यति॥ तथोक्तदस्यापि। तत्प्रसादवाक्यानः सर्वत्रिं न विष्यति। इत्युक्त्वांतर्हितः। श्रीवल्लभेन काश्यां
गत्वा तथैवकृते पश्चाद्बदर्याश्रमं गत्वा व्यासदर्शनाकांक्षया स्थितं। एकदा साक्षाद्व्यासदर्शनं भूत
न्तदा व्यासेन श्रीवल्लभं प्रतिसंज्ञोक्तं। त्वयि साक्षात्कृष्णावेशोनविष्यति मन्मतानुसारि

श्रीभागवतव्याससूत्रादिभाष्यं कर्त्तव्यं संप्रत्यसुरभागोत्पन्नैर्मायावादः प्रवर्त्तितः तमपाक
र्तु॥ इत्युक्त्वांतर्हितो व्यासः॥ तदनु हरिद्वारमागत्य कुरुक्षेत्रे श्रीवल्लभः समागतः तत्र स्थानेश्व
रं नाम नगरं। तत्र रामानंद नामा यात्रिकवैष्णवः। तत्र देगलातद्वा॥ तिष्ठं गृहीत्वा प्रविष्टं तेना
य ध्यूनादिकमपि दृष्टं। तत्र श्रीभागवतश्लोकैकस्य व्याख्यानं कृत्वा पुनस्तस्मात् शुश्रूषा समजनि
आहृत्य॥ कियत्कालमत्र स्थातव्यं। श्रोष्येऽहं त्वन्मुखाद्भागवतं। श्रीवल्लभेनोक्तं। यद्वा घरे हा॥ एत
स्मिन्नंतरे आगमोक्तविधिना रामानंदो विष्णोः प्रतिमां कर्त्तुमारेभे। तत्रैका शिला वज्रकीटजा भगव
न्मूर्तिः शालिग्रामशिलाख्या। शालिग्रामशिलायां तस्य मूर्तौ श्रद्धा। जगन्मूर्त्तेर्नाहृशीना। तत्र दृ
ष्ट्वा श्रीवल्लभजस्तमाह॥ त्वमनुनय तत्र सादरं हृष्टांकुरा॥ रामानंद आह॥ शालिग्रामशिलास्वायं
भुवी। वज्रकीटविनिर्मिता। प्रतिमेयं कृत्रिमा॥ अतः शालिग्रामे विशेषः॥ श्रीवल्लभजस्तमा ॥२४॥
हा॰र ह॥ प्रतिमां सा बोद्धुमार्विया॥ शालिग्रामशिलातन्मंदिरमिति॥ यथोक्तं स्कंदे॥ न तथा रमते ल
क्ष्म्यां न तथा स्वपुरे हरिः। शालिग्रामशिलाचक्रे यथा रमते सदा॥ अतः शालिग्रामशिलामंदि

स्मृतं ॥ तथैव पाद्मे ॥ अर्चायां विष्णौ शिलाधीर्गुरुषु नरमतिर्वैष्णवे जातिबुद्धिर्विष्णोर्वा वैष्णवानां कलिम
लमथने पादतीर्थे बुद्धिः श्रीविष्णोर्नाम मंत्रे शब्दसामान्यबुद्धिर्विष्णौ सर्वेश्वरे शेषतदि
तरमतिर्यस्य वा नारकी सः ॥ श्रीजगन्नाथ विठ्ठलनाथ ... तिमायां साक्षात्त्वं लोके प्रसिद्धं ॥ एवं श्रीव
त्सेनोक्तं श्रुत्वापि रामानंदेन मेने ॥ एवं मध्याह्ने तेनायं विवादः समजनि ॥ रात्रिश्च जाया मपि श्रुत्वा पिन
मानयामास ॥ श्रीवत्स ... नस्य रोषः समजनि ॥ निशि रामानंदेन संपुट मध्ये भगवत्प्रतिमां उत्थान शायिनं
कृत्वा हृदि शालिग्रामशिला स्थापिता । ततो वार्ती तायां रात्र्यां अरुणोदये स्नातुं झझांकर्ढउत्थाव पिगतो ॥
कृतो वन्हप कनिस्योजातो तदा रामानंदः झझांकर्ढ मंझर मुद्घाटयामास । तदा शालिग्रामशिला द्वादश
धा खंडशो जाता ॥ तत्र द्वादशात स्पशंकर मिश्र नामा लघुभ्राता तमाह ॥ रामानंदभ्रातस्त्वं व्रजस्व को यं म
हानुभावः यद्धाकार्यकरणे महाननर्थः समजनि ॥ तं ना व्वातेन दृष्टं ॥ यथा शालिग्रामशिला जाता तथा
यमपि भविष्यति ॥ इत्युक्त्वा सो तीर्थांतरं प्रस्थितः श्रीवत्सेन नववर्षपर्यंतं क्रमे पंचदशयोजन एकाग्र
दक्षिणा ॥ एवं तीर्थाटन व्याजेन प्रदक्षिणा द्वयं कृतं ॥ व्युपानात्त ॥ असंग्रही एकः सेवको मे घनश्याम दासना
मा ॥ ...

शत

मा।मरुस्थलेपर्वतेजलेवा।ग्रा[illegible]वभोजनादि प्रतिदिनमवलोकं तेन तान दिव्यरेखया यत्र कुत्रापि
भोजनादि प्रतिदिनं प्राप्तिर्भवत्येव॥न तदधिक संग्रहो पेक्षा च॥श्रीभगवज्जीता भागवत मूलपुस्त
कं।शालिग्रामशिलेका॥यद्दिने रामानंद गृहात् प्रस्थितं तस्मिन्दिने किमपि भिक्षादिर्नजाता॥
महद्दुःखं समजनि।रामानंदगृहे रात्रौ स्वप्ने निशि भगवतोक्तं॥त्वमेनं भागवतं श्रावय सुतदोष
वशान्नकृतं॥ततएवं यातं॥पुनर्यत्र गत्वा सुप्तं तत्र स्वप्ने उक्तं श्री[illegible]ष्णद्वैपायनो दृष्टे॥श्री
कृष्णः कृष्णद्वैपायनं प्रत्युवाच॥वत्स श्रीभागवतं प्रादुरासीत्।तदर्थज्ञापनाय मन्मुखमेवा
ग्निर्बध्नीयमवतीर्णः मदाज्ञयापि मदीयानु प्रति भागवतान्कथयति।तदा मासे न श्रीव २५
ध्वनावापि श्राद्धाः भगवदाज्ञया भागवतार्थः प्रकटनीयः वक्तव्यः ततः श्रीवध्नो भ
गवंतं प्रत्याह॥रामानंदोयं त्वदीयो न वा।भगवानाह।मदीय एव॥श्रीवध्न उवाच।ना ॥२५
स्य माता का।री।भगवानाह।अयं कासिं।अस्मिं[illegible]ग्रामे अर्जुन पुरः सरोजत्वाम्भ

वासत्तनतू॥

गोन॥ अस्य जन्म सहस्रं गाथि॥ तेन च दृष्टं सिद्धांतं न मन्यते॥ बहुभिर्मुखैश्च न वि

ध्यति॥ त्वया स्वगृहं गत्वा भगवतां वक्तव्यं॥ ततः श्रीवत्सेन गाथितः श्रीब्रह्मजन्मशत

मवशेषं तथा कृतवान्॥ ततस्ते प्रबुद्धः॥ पुनस्तद्गृहं गत्वा मार्गदिदृक्षा मस्य पदत्वा क्रियतां भ

गवंतं कथितं॥ तच्छ्रुत्वा शंकरनामा सर्वतिनाम्ना वत्सजन्मप्रपन्नः यः ग्रन्थदासः रतिश्च ततः

मा ततः श्रीवत्सनः काश्यां जगाम॥ एतस्मिन्नंतरे श्रीरामस्य पार्श्वजाताः त्वं गृहस्थीनवा श्री

वत्सेन तत्समेन॥ तदा महानुपद्रवो धूर्तेभ्यो कंठपाशलक्षणः समजनि॥ ततस्तो विचारितं ह

वंती धाटनं कुर्वतो मम किमपि उपद्रवो न जातः॥ एवं क्लेशान्मुक्तो विचार्य सुप्तं॥ पुनः स्वप्ने श्री न

वत्सेनोक्तं॥ विवाहं कुर्विति॥ श्रीवत्सेन भगवंतं प्रत्याह॥ किं गृहाश्रमे गौहं वयेव कता घोऽस्मि

न विषये मे मतः॥ भगवानाह॥ तव गृहे भवंती ईरस्मि रूपद्वयेन॥ तयो निमित्तो गोपिनाप्य

ति

विहृत्य नार्यौ प्रति निगम्य भगवत्पादाचार्यात् ॥ स च ग्रामांतरेण काश्यपं गतं ॥ तत्र गत्वा विवादमकार्षीत् ॥
अग्निपरिग्रहश्च तत्र तः। ततोग्निहोत्रादिविधिना यथादेशं यथाकालं गंगवंतं नानायज्ञैरियाज ॥
ततः पुनरेकदा श्रीब्रह्मस्य पार्श्वे [illegible] समजनि। मायावादिभिः सार्धं विवादं कृत्वा मायावादमपन
य। ततः सुदिनमुहूर्तं वीक्ष्य लोक्य भगवतो मृडानीपतेर्द्वारि छत्रावलंबनं कर्तुमारेभे। तद्यथा लि
खितं। श्रीब्रह्मस्य प्रसादेन मायावादो निराकृतः। अवैदिको महा[illegible]देवस्तत्र साक्षी न संशयः ॥
१॥ ये वैदिका महात्मानस्तेषां चानुमतिस्तथा। अवेदविन्मते [illegible] यथा चोपपद्यते तः पुनः ॥२॥ स्था
पितो ब्रह्मवादो हि सर्ववेदांतगोचरः। काशीपतिस्त्रिलोकेश महादेवस्तु तत्र च ॥३॥ कस्यचित्त्व
त्र संदेहः समागच्छतु सर्वथा। न जयं तेन कर्तव्यं ब्राह्मणानामियं गतिः ॥४॥ इति डिंडिमवादितो द्वारि
विश्वेशस्य मयात्र हि ॥ विद्वद्भिः श्रवणं कार्यं ते हि सन्मार्गरक्षकाः ॥ ॥ तत्र ये विद्वांसो ब्राह्मणाः ॥२६॥
संन्यासिनश्च ते [illegible] ब्रह्मणि तत्पराः प्रत्यासमेत्य श्रीवल्लभं प्रपच्छुः को मायावादः किंलक्षणः।

ड्डिः

न

योनवद्भिः निराक्रियंते।। कोब्रह्मवादः योनाड्डिः स्थाप्यते।। तावदिदं वक्तव्यं। श्रीवल्लभेनोक्तं भवंतो
ब्रुवंतु किंब्रह्म। कीदृशोयंप्रपंचः।। कीदृग्जीवः ततस्तैरुक्तं। मिथ्याप्रपंचः निर्धर्मकंब्रह्म। जीवोब्र
ह्मकस्त्वब्रह्मैवेति। वेदार्थोभगवताशंकराचार्येणादर्शि। तत्श्रुत्वा श्रीवल्लभ आह।। एवमेवबायावादः।।२
मयासावेवनिराक्रियते।। ब्रह्मवादलक्षणं श्रूयतां। सत्योयंप्रपंचः सधर्मकमेवब्रह्म।। अणुरेवजीवः
इतिवेदार्थोभगवताकृष्णद्वैपायनेनादर्शि।। ततः सक्रोधैस्तैरुक्तं।। कस्त्वंयः शंकरमतंदूषयसि।। तदा
श्रीवल्लभेनोक्तं।। भगवतः श्रीपुरुषोत्तमस्याज्ञयासुरप्रवृत्तीनांमोहाययासावयतीर्णः। यथोक्तंपाद्मे भग
वता।। द्वापरादौयुगेभूत्वाकलयामानुषादिषुस्वागमैः कल्पितैस्त्वंचजनान्मद्विमुखान्कुरु।। अतोना
यतेतन्मतंव्यासस्याभिमतंन।। अतोयथाश्रीकृष्णेनगीतायांसर्वोपनिषदार्थउक्तः।। तथैवबादरायणेन
सूत्रातोब्रह्मजिज्ञासेतिब्रह्मसूत्रेउक्तः।। तथैवकल्पतरोः फलेश्रीभागवते एवंक्रमोंगीकर्तव्योभव
द्भिः।। यथोक्तं। बुद्धावतारेत्वधुनाहरौतद्यशागताः सुराः नानामतानिविप्रेभ्योप्यसाऽकथीतिमोहनं।। अ
तोयूयंवेदार्थोत्क्रांताः वेदार्थंविच्छिन्नंच।। ततःश्रुत्वासक्रोधैस्तैरुक्तं। अहोवयंपरंपराचार्यैर्दर्शि

श्रुति

तं मार्गं विद्वार्थं जानीमः॥ त्वं तं द्वारीकत्य पाषंडं स्थापयसि। ततश्रुत्वा श्रीवल्लभेनोक्तं। पाषं
डलिंगं न वक्ष्येव। यतः शिष्यास्तत्रैन दृश्यंते॥ ततस्तै रुक्तं। श्रुतिष्वेव संन्यासिनां शिषास्तत्र परि
त्यागउक्तः॥ इत्युक्त्वा श्रुतयः पठिताः। श्रीवल्लभ आह। कस्मिंता स्त्रिमाः संगतिश्रुती नामने
काः शाखाः संति। तासु संन्यासधर्माः पठिताः संति॥ तासु चेत्तन्दृषिष्ठ [illegible] धं उच्छिन्नाः शाखाः
श्रुतयो नोपठनीयाः। प्रमाणं नावात्॥ इत्युक्ते सति किमपि नोक्तं॥ एवं षण्मासं यावद्विवादः स
मजनि॥ तदोपेंद्राश्रम नामा संन्यासी सर्वश्रेष्ठः तदग्रे मध्यस्थैरुक्तं। अयं कोप्यमानुषो। विवादेजे २७
तुमशक्यो तोलं विवादेन। ततः कैश्चिदुरात्मभिर्मारणोद्यमः कृतः तदा श्रीमहादेवेनाज्ञा दत्ता॥
अत्र न स्थातव्यं। यत्र भागवती सृष्टिस्तत्र गंतव्यं॥ सर्वोपनिषदुपगीतं श्रीकृष्णाख्यं परंब्रह्म लो
पदृश्यं। अत्र यादृशी भगवदिच्छा तादृशमस्ति। ततो दूरे तावन्नाश्रमे चरणाद्रि इति नगरं। तत्र
वसतिः कृता॥ तत्रैकदा गंगास्नानं कुर्वतः श्रीवल्लभस्य शंकराचार्यः प्रादुर्बभूव॥ आह च।

त्वया मन्मतं दूषितं । एतस्मिन्नंतरे श्रीकृष्णः प्रादुर्बभूव ॥ आह च ॥ तत्वमेव वल्लभेनोक्तं ॥ अव
र्त्तयिष्यते । शंकरोक्तं । गोकुलं [illegible] गच्छेत्त्वं क्वांतद्दिति । ततः श्रीवल्लभः साग्निहोत्रो मथुरामं
डलमाजगाम ॥ तत्र बृहद्वने गोविंदस्थले भगवन्मंदिरं कृत्वा भगवत्सेवां कर्तुमारेभे ॥ तत्र कश्चि
त्काश्मीरदेशीयः केशवभट्टनामा राधितशंकरस्तत्समादृप्राप्तवैष्णवधर्मः श्रवंस्तत्र वसतिःस्म
तयोः परस्परं मैत्र्यभूत् । श्रीवल्लभस्यालौकिको भागवतार्थः केशवभट्टेन ज्ञातः । प्रार्थितं च
अत्र श्रीभागवतं व्याख्येयं । भवान्वक्ता श्रोताहं ॥ ततः सुदिनसुमुहूर्ताद्यालोक्यादितः श्रीभा
गवतव्याख्यानमारब्धं ॥ कालक्रमेण समाप्तं ॥ ततः केशवभट्टेनोक्तं ॥ मयात्वद्वैयादृशोद्यो
[illegible] श्रीभागवतस्यावधारितः सोपि गतः त्वदुक्तोपि नमे हृदि समागतः । तत्किं श्रीवल्लभे
नोक्तं । समासेनउपविश्य भवता श्रुतं ॥ अतस्ते हृदि नागतं । न मया कदापि विक्रीतं हृत्स्वार्थे । अतः
मदुक्तमन्योक्तं सदृशं मा जानीहि । मया त्वामुद्दिश्य नोक्तं ॥ चतुरशिष्योत्तवैद्यं माधवभट्टनामात्र

विद २

T3

यं मे श्रोतामत्स्यमेनं देहि ॥ ततः केशवभट्टैः [?] निरन्यैं सार्द्धं श्रीवल्लभाय समर्पितः ॥ ततस्तस्य
त्मसमर्पणं कारयित्वात्मीयं विधाय श्रीभागवत टीकायां लेखने प्रवृत्तो सावेव माहात्म्यं जातः
ततोन्यः कश्चित्कान्यकुब्जीयो नारायणमिश्रनामा श्रीवल्लभस्य शिष्योऽभवत् ॥ तादृशश्च ततः
पाश्चात्याः सात्वताः ब्राह्मणाः क्षत्रियाश्च बहवः सेवका अभवन् ॥ एकैकस्य चरितं सकुणा
श्चवर्षयुतेनापि वक्तुमशक्याः तथैव ग्रन्थाद्दाहिणात्पा श्च ॥ अथैकदा श्रीवल्लभः गोकुले गृहा
६ दि: सेवकैः कृतचतुरसेवः स्नानालंकारचंदनपुष्पमालाभिरलंकृतः सुखेनाल्पदिनशेषाव
शिष्टकालउदन्मुखमेव कैः सहोपविष्टः ॥ तदोत्तरस्यां यमुनातीरे साक्षाद्व्रजराजकुमारः प्रकटी २८
बभूव ॥ हस्तेनाकार्य समुनामुत्तार्य पार्श्वमानिमु रवं प्रस्थितः ॥ ततः श्रीवल्लभोपि वस्त्रादिकं तत्रैव
वोत्तार्य कौपीनाच्छादनावशेषस्तत्र गत्वानेनैव मार्गेण यमुनामुत्तीर्यनिगच्छंतमनुवव्राज ॥ मथुरां ॥२
दक्षिणतो विमुच्य यावद्गोवर्धनाचलं ॥ तत्रान्नकूट शि खरस्थ श्रीगोपालराज श्रीगोवर्धननाथा

ऽधिष्ठानं।तत्रगत्वाभगवतास्थितं।श्रीवल्लभजनसन्मुखमनसोक्त्वावादीत्।अत्राहंगोऽकुलात्श्रीम
त्राधिकयासमानीतः।त्वंदूरागमनेनक्लिष्टोसि।।अथश्रृणु।।यावद्गंगाकलौजकयजलातावद
त्रैवास्मिन्नेवस्वस्वरूपेत्वन्मार्गीयैस्त्वःसेवांग्रहीष्यामि।।प्रकटःसन्।अत्रैवममश्राणवल्लभाया
एकांतविहारस्थलः।।सर्वदा यत्रसातत्राहमपि।।यथोक्तंदशमस्कंधेनंदंप्रति।।नतःपुरोजनपदा
कस५ न्ग्रामानगृहाश्च वै।।वयंवनौकसःतातनित्यंशैलवनिवासिनः इतिश्लोकस्मीति।।तत्रैवकिमधिकं।।
तु इत्कांतस्थितंभगवतातस्मिन्नेवस्वरूपे।।ततःप्रभृतितत्रसिद्धस्थानंवल्लभीयानां।।पूर्वंश्रीविष्णुस्वामि
बिल्वमंगलादीनांगोवर्धननाथएवसर्वस्वं।।तच्चवंश्रीगिर्याख्यापिकायांप्रसिद्धं।।यावच्छ्रीवल्ल
भेनभगवन्तमनुगतंतावत्सेवकेनप्रभुदासाख्येनक्षिणीनिमील्यजलपानादिसत्का तत्रैवपति
तं।।पुनःश्रीवल्लभेसमागतेवत्सालंकारमतिदृष्टेसतिजलपानादिक्रियाकर्तुमारब्धा।।एकंकालां २८
तरमवाप्यश्रीवल्लभःकतिपयसेवकैःसार्धंश्रीगोवर्धननाथालयेजगाम।।तत्रसर्वसमक्षंदधि

मंडनवनीतपात्रं गृहीत्वा श्रीराधिका भगवन्मंदिरमध्ये प्रविष्टा। तत्रैवांतर्हिता। ततो भगवन्मुखेन नव
नीतदधिमंडलेपः सर्वैः प्रत्यक्षतो दृष्टः। एवं बहून्याश्चर्याणि दृष्टानि। पुनर्गोकुलमागते श्रीवल्लभे से
वकेन तदा भयान्स्वाम्यमेव वस्त्ररक्षितं कृतं। तत्र रात्रौ बालकृष्णेन क्रीडितं। तत्र तच्चरणचिह्नानि सर्वैर्दृ
ष्टानि। पुनः समयांतरे श्रावणस्यामलपक्षे एकादश्यां माहात्म्यनिशि। भक्तश्लोकाः साक्षाद्भगवता उक्ताः
पुनरेकदा कश्चित्सेवकः। श्रीकृष्णदर्शनाकांक्षी हा कृष्ण कुत्रेति बृंदावनं बभ्राम हृष्टहृदय घने वने। तदा भगवता
[illegible] वल्लभं प्रति कथितं। तत्सेवकसमीपं गत्वा नीवेदः कृष्णेति वदन्सो दृष्टः सोऽति। तथैव श्रीवल्ल
भः कृतवान्। ततस्तस्य गोकुलपतिः साक्षादभवत्। तिरोधानानंतरं श्रीवल्लभमेव प्रपन्नो जातः
कश्चिद्गंगातीरे श्रीवल्लभशिष्यो [illegible] भगवत्सेवां कुर्वाणस्तिष्ठति। एकदा भगवांस्तमाह। अतस्त्वतीये हि
त्वांवे [illegible] भेच्छा नीतिरतिजातस्य महद्दुःखमजनि। सेवारसिकत्वात्। तथापि तत्तथैव जातं।।
पुनरेकदा गोकुलात्प्रयाग स्नाने ते श्रीघरे यावत्सति कुर्वाणः सा [illegible] ग्निहोत्रः श्रीपुरुषोत्तम माय

ततं ग्रामः ॥ तत्रैको महात्मा श्रीकृष्णचैतन्यनामा ॥ तस्य श्रीपुरुषोत्तमस्याज्ञा जाता । मद्रूप
मेव वल्लभनामानं याहि ततः ॥ तं मदग्रे मद्भुक्तं पाणौ इति श्रीजगन्नाथवाक्यात् तथैव वासो कृतवान् ॥
एकदा पूर्वं गंगातीरे वसतः श्रीवल्लभस्य गृहे श्रीकृष्णचैतन्यैः समागतं ॥ तं मदृष्ट्वा पूर्वं दृष्ट्वा श्री
वल्लभेनोक्तं ॥ इमे कृष्णचैतन्याः इत्युक्त्वा नमस्कृताः तत्समये मध्याह्नभोगानंतरं भगवतिशय
नं गते सति श्रीवल्लभेन ताभ्यां पन्यापक्वमन्नं । परन्याह । अनिवेदितं कथं देयं । श्रीवल्लभेनोक्तं । दे
यमेवास्य हृदिस्थः श्रीकृष्णो नो ज्ञास्यते वा । एकदा श्रीपुरुषोत्तमे श्रीवल्लभशिष्यान् प्रति श्रीकृष्णचैत
न्यैरुक्तं भवद्भिः श्रीवल्लभे गुरुबुद्धिर्न कार्या । न पंडितबुद्धिः । न वैष्णवबुद्धिः । अयं तु साक्षात् देव ३०
कीनंदन एव । तत्र पुरुषोत्तमायतने बहून्याश्चर्याणि जातानि । ततस्ततो मथुरामंडलं प्रस्थानं गं
मिष्यामिति ॥ एकदा गंगातीरे वसतः श्रीवल्लभस्य ज्येष्ठसुत गोपीनाथजन्म निजाते भगवत्सेवा ॥ ३
कुर्वाणस्य कष्टेरिंगमाणो शिशोः स्पर्शः समजनि ॥ सेवायां चेतो व्यग्रमभूत् ॥ तदा स्वचेतसायां ये कुर्वं:

त्वयाकस्माच्छिशुर्नरक्ष्यते। पत्न्याह। शिशुःसुन्नोस्तितच्चरितमपिभगवदीयंमत्वालक्ष्मीमासीत्।।
श्रीवर्द्धनस्ययःकाश्मीरदेशीयोमाधवनंदनामाभगवत्सेवार्थंतदाज्ञयास्थितः।।सनुदिनंदश
मस्कंधपंचरत्नपाठंकरोति। स्मा एकदानिशिस्वप्नेकेनाप्युक्तंतवपरोक्षःसतत्कुमारदर्शनंभावीति
प्रबुद्धस्ततःपरोक्षंमध्याह्ने एकाकीभगवद्धाम्निप्रविष्टः।पंचहायनंबालंददर्श।।बालोपिभगवंतंनमस्कृ
त्यस्त्रीद्रव्यंविष्टाप्रायंजानीहीत्युक्त्वांतर्हितः।।ततोमाधवनंदेनश्रीवर्द्धनस्याग्रेआगत्यकथितं।।त
तःश्रुत्वाश्रीवर्द्धनेनमाधवनंदोशारंगंप्रेषितःएतस्मिन्नंतरेसिद्धपुरवासीरामायणाख्योव्या
सवैष्णवस्थानेवासीरामानंदशिष्योभूत्वासिद्धपुरेसेवांकर्तुमारेभे।।तत्रबहवोगु
र्जरदेशीयास्तंप्रपन्नाः।तेषांमध्येएकोद्विवेदीगोविंदनामातत्पितानारायणदासश्च
अदीघ्रावसानंदारव्यस्था।सानंदरव्यस्यपत्नीपुत्रौद्वौहारकायामग्निनाम्नसुमवाप्नुः
।ततोसौकाशीसमीपेगंगातीरेगत्वाश्रीवर्द्धनंआध्यात्मसमर्पणंकृत्वास्वदुःखंनिवे

यामास। ततः श्रीवर्द्धनेन कियत्कालं प्रतीक्ष्य पुनर्द्वारकायां प्रेषितः व्यासवैष्णवस्य प
श्चात्ततो मृत्युमवाप। एतस्मिन्नंतरे श्रीवर्द्धनः क्रमेण देशानतिक्रम्य द्वारकामभिजगाम। मा
३१ र्गमध्ये श्रीवृक्षस्य पादांबुजमग्निनजक्रिर्द पार्श्वेस्तत्र पूज्यमानो बहून्वत्सरानथ कर्तुं सिद्ध
पुरे जिगमिषुर्जातस्तदा भगवता निवारितः। द्वारकामेव व्रजेति ततो द्वारकां गत्वा श्रीभा
गवतव्याख्यानमारेभे॥ तत्र द्वौ मुख्यौ श्रोतारौ द्विवेदिनारायणः अच्युताश्रमनामा द
ण्डिनस्तयोः कश्चित्संन्यासी। एकदा द्विवेदिनारायणं प्रति श्रीवर्द्धनेनोक्तं। व्यासं नाराय
णाख्यमत्रानय। ततस्तु त्वा सिद्धपुरादाकारितोपि नागतो रामानंदशिष्यत्वात्। तत
श्रीवर्द्धनेन सक्रोधेन विमर्पितं। तन्नवतु नाम श्रीवृक्षोस्मदाय एव श्रसा व्यापया
स्यति। यदैव मुक्तं तदैव व्यासस्य गृहे उपद्रवो जातः॥ स्थानात् श्रीवृक्षोपि द्वारकां ग
तः। केनापि स्वप्ने दृष्टः। ततः श्रीभागवतं समाप्य भगवज्जीताव्याख्यानं कृत्वा द्वात्रिंश

दुपनिषद्व्याख्यानं कृत्वा श्रीनारायणाख्यं अच्युताश्रमं श्रीवल्लभो भगवत्पदं प्रापितवान्
तयोर्मृतुसमये भगवद्भूतदर्शनं बहूनामेव जातं ॥ ततः प्रस्थानुमारेभे । एतस्मिन्नंतरे मा-
यावादान्निः साधीं विवादः समजनि ॥ तां निर्जित्य प्रयागं याही । तिमाधवमहं प्रत्यक्षकृत्वा व
सन्तद्वारव्यं गदहस्त्वं कारयित्वा हिवेदिगाविंदं भगवत्सेवायां स्थापयित्वा पुनः श्रीपुरुषो-
त्तमं प्रति प्रस्थिता ॥ ततो राणाख्यो व्यासः श्रीवल्लभमेवानुपुरुषोत्तमं जगाम । तत्र गत्वा प्रपन्नो
भवत् ॥ ततो गुर्जरदेशात् द्वौ ब्राह्मणौ श्रीवल्लभपदांबुजदर्शनाकांक्षया श्रीपुरुषोत्तमं जगम
तुः ॥ तत्र गत्वा तं प्राप्य कियत्कालं संस्थितौ ॥ तत्रैकदा श्रीजगन्नाथो हस्त्यारूढो विहारार्थं निर्गतिः
तत्र दृष्टुकामो गतो तत्र भगवत्स्वरूपं श्रीवल्लभरूपमेव ददृशतुः ॥ पुनः श्रीवल्लभस्थाने माग
त्य श्रीवल्लभं ददृशतुः ॥ तद्दृष्टं तदग्रे कथयतां ॥ एकदा श्रीपुरुषोत्तमयात्रायां कश्चित् श्रीवल्ल
लानुचरी पार्श्वे श्रांता गंतुमशक्ता जाता ॥ श्रीवल्लभेन ज्ञात्वा पिशीघ्रमग्रे गतं ॥ सर्वके स्त्रान्लिवे

दि तपि सारा२ चोए काकिनी श्रीपुरुषोत्तममल्पवयसं बालपुत्रमिव ददर्श।। आहासौ
अद्य श्रीवल्लभेन त्वानेतुं प्रेषितोस्मि।। शीघ्रं व्रजेति। सा तेन सार्धं भगवत्स्थानं प्राप्ता।। अथै
३२ कदा गोकुले स्वसेवकस्त्रियाभिः प्रार्थितं।। अद्य नंदस्य वयं श्रीवल्लभेन सार्धं यमुनायां जलक्री
डां कर्तुं कामाः स्म।। तैः प्रार्थितः श्रीवल्लभः तथैव कृतवान्।। तत्र सर्वेपि किशोराकृति श्रीनंदराज
कुमाररूपं श्रीवल्लभं ददृशुः।। अथैकदा प्रयागे श्रीवल्लभपत्नी तन्माहात्म्यं द्रष्टुकामासीत्।।
तया विशयने ग्नितेजःपुंजमध्ये श्रीकृष्णरूपमेव श्रीवल्लभस्य रूपं दृष्टं। एतस्मिन्नंतरे बदर्याश्रमे
हयवेल्लाव नामा कश्चिद्वसति।। तेन सार्धं श्रीवल्लभस्य महती प्रीतिरभूत्।। तस्य भगवत्कृपया
भगवत्प्रागट्यमभूत्। तेन श्रीवल्लभस्यालौकिकमाहात्म्यं दृष्ट्वा भगवंतं प्रति पृष्टं।। संप्रति श्री
घोरकलौ श्रीवल्लभमाहात्म्यं अलौकिकमेव दृश्यते।। किं तत् अस्तोर्के भगवता नारायणे १३
न।। अयमग्निर्व्यासनारदरूपश्रीकृष्णांशैः प्रादुर्भूतः। स्वर्वे मत्स्यांशेनेकवारं राजा जो ज

इत्यलं तत्॥ व्याख्यानं व्यासत्वेनोचार्यत्वं। अग्नित्वं व्याख्यानकौशलत्वं वागीश्वरत्वात्। नार
दत्वेन भक्तिप्रावर्तकत्वं। श्रीकृष्णत्वेन सर्वसमर्पकत्वं रुद्रत्वेनाग्रे संन्यासाश्रममवाप्य ब्रा
रूपां स्वगतिः॥ भगवद्भोगः श्रीविठ्ठलेश्वरः प्रतिष्ठितो भविष्यति इत्युक्त्वा भगवानंतर्हि
वस तः ततः एकदा प्रयागेऽत्रर्कद्भुरतिं प्राप्य श्रीवल्लभो मर्त्यलोकं जिहासुरभवत्॥ तदा ज्येष्ठ
पुत्रमुद्दिश्योक्तं। अथ न चिरेण श्रीपुरुषोत्तमायतनेऽपुरुषोत्तममेष्यति॥ अयं श्री
विठ्ठलेश्वरो वंशधरो भविष्यति। श्रीभागवतार्थोऽस्मिन्नेव मया स्थापितः। एतस्मि
न्नंतरे माधवभट्टाः श्रीवल्लभानुग्रहात् भगवत्तमवापुः॥ प्रभुदासम्भ्रमदद्दलोक्तिकरी
त्यर्थं तदा श्रीभागवतस्य टीका स्कंधत्रितयस्य कृता तदा श्रीबालकृष्णेनोसंयोगेन पविश्येपोक्तं॥
मदीयं चरितं मा कुरु। तदा दशमस्कंधव्याख्यानमेव कृतं॥ द्वितीयस्कंधे सूक्ष्मेः सुरेतरवरूथप
विमर्दिता या इत्यस्य व्याख्यानं श्रीवल्लभं प्रति श्रीकृष्णेनैवोक्तं॥ निबंधमध्ये ग्रहं सर्वात्मना

त्यान्यमित्यादिश्लोकद्वयं साक्षात् श्रीमुखेन लिखितं ॥ पूर्वमेकदायोध्यायां श्रीवल्लभकृ
तं श्रीभागवतव्याख्यानं विप्ररूपेणादनुमताश्रुतं । एकदा बदर्याश्रमे [illegible] वामभ्यास
न्तत वामकपोल इत्ययमध्यायः श्रीनारायणेन वल्लभमुखाच्छ्रुतः एतस्मिन्नंतरे श्रीव
ल्लभेन तैलंगकंडुरस्केन स्वपत्नीं त्यक्तं । मह्यमाज्ञां देहि । अतोहं प्रव्राजिष्ये ॥ सा तां नादात् ॥
तदाऽकंडुरेस्तु पद्वोकस्मात्कृतः ॥ तदा पत्नी श्रीवल्लभमग्निहोत्रशालास्थं प्रत्याह । स्वामिन्नि
र्गम्यतां गृहादग्निरायाति ॥ एवमुक्ते तामेवाज्ञां मन्यमानः ॥ श्रीवल्लभो निर्गत्य गंगातीरस्थ पवि
ष्टः । तत्र त्रिदंडविधिना यथा विष्णुस्वामिना तथा यती भूत्वा तैः काश्यां गतं ॥ तत्रैव विंशति मे
द्विवसे स्वरूपमाप्तः । ततः कियता कालेन तद्रूपेषु पुत्रो गोपीनाथ पुरुषोत्तममासाद्य स्वरूपमव
पा ॥ तत्पुत्रः पुरुषोत्तमाख्यस्य । अथ श्रीविठ्ठलेश्वरः सर्वदा जयति । तत्पुत्राः श्रीगिरिधरादयः श्रीव
ल्लभनंदनवमाः पौत्रादयश्च सर्वदा जयंति ॥ छ ॥ इति श्रीसंप्रदायप्रदीपे श्रीविष्णुस्वामीबिल्वमंगलप ॥३३॥
॥छ॥ अथोपनिषदांततत्त्वं यच्छलेति परं विदः ॥ तदे
रिकरे श्रीवल्लभचरिते चतुर्थप्रकरणं ॥

वदेवकीडत्रः साकारव्यापिनुर्गुणः ॥ एतावान्सर्ववेदार्थस्तदन्यो ग्रंथमोहनं ॥ इति निर्णीयते यात्र नत्वा
श्रीवल्लभनंदरिं ॥२॥ यतो ब्रह्मपर्यवसिता वेदांताः अतो ब्रह्मप्राप्तिरेव पुरुषार्थः ॥ तद्रूपत्वेष्वेकेस्य
प्राप्तिः ॥ अतो येऽधर्मान्निषेधस्वरूपमेवोपादिशंतीति तेऽश्रुत्यर्था द्रष्टाः ॥ अतः यं कियस्संख्याः यथोक्तं
बृहदारण्यके ॥ स यथार्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा निःसरंत्येवं वा अरेऽस्य महतो भूतस्य निःश्वसि
तमेतद्यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वांगिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्या
नानि ॥ व्याख्यानान्यस्यैवैतानि तानि सर्वाणि निःश्वसितानि ॥ अत्र यदुक्तं तत्सर्वं वेद एव ॥ अतो ज्ञायते श्रु
तिस्मृतीतिहासपुराणैः सर्वैः श्रुतिपठितः क्रमः श्रोतव्यो मंतव्यो निदिध्यासितव्यो द्रष्टव्य इति दर्शन
पर्यंत मेकैकतरेण न भवति ॥ यथा शौनकीय माहात्म्यकादश्यादिव्रतविधानफलनिरूपणादि सातिशय
शास्त्रादिकार्यं केवलं ॥ ऋग्यजुःसामाथर्वाख्येन भवति ॥ किंतु वेदांगपुराणस्मृतीतिहासैः समग्र
धर्मनिर्वाहकर्मकांडे एवं निवृत्तिकांडेऽपि गादिभिः सेतिहासपुराणैः सर्वैरेव दर्शनपर्यंतं ब्रह्मनि
र्णयः ॥ नान्यथा ॥ यथा एकतरांगीकारे ॥ अंधस्य गजस्पर्शनवत् ॥ एकदेशीयावगतिः न तु समग्रा ॥

यद्यद्रूपानामाकर्मकं ब्रह्म तद्धि श्रोतव्यमरता[illegible]दयः। किं विषयः परं श्रुतिस्तु यथा निरूपयति॥ तत्र
वेदार्थः संदिग्धो भवेत्॥ अथ वेदार्थनिर्णये किं प्रमाणं॥ कृष्णद्वैपायन एव॥ स यद्यनामासौ कथं
श्रोतव्यः। यद्यद्रूपः मननं निदिध्यासनं दर्शनादेक कृष्णद्वैपायनप्रमाणं यथा स्कंदपुराणे स्तुत
वचनं॥ देवाश्च ऋषयश्चैव वेदार्थे मूढतां गताः। पुरा ब्रह्माणमेवाद्यं जग्मुः सर्वे विवस्वतः॥१॥ गत्वा
स्तुत्वा वचनं प्राहुस्ततः पितामहं॥ दुर्ज्ञेयाद्यो वेदराशिः क्रमाद्योनि[illegible]कवाक्यता॥ कथं तद् वदस्व
भगवन् वयं जानीमहे जसा॥ ततः श्रुत्वा भगवान् ब्रह्मा उक्तवान् पुरुषोत्तमं॥ ब्रह्मोवाच॥ ये वेदरूपो वेदार्थो
वेदकर्त्ता च वेदवित्। वेदार्थे मूढबुद्धीनां स वेदार्थं ब्रवीतु नः॥४॥ सत्यं सत्यं पुनः सत्यं न देवः केशवा
त्परः॥ नास्ति वेदात्परं शास्त्रं एतत्सत्यं सज्जपत्र॥५॥ इति स्तुतो हृदाकाशे प्रादुरासीत्॥ स्वयं हरिः॥ सु
वाचाजं व भगवान् यः स्वयं पुरुषोत्तमः॥ संनविष्यामि कन्यायां सत्यवत्यां पराशरात्॥ वेदार्थं चैव कृत्स्ना
नि सर्वेषां हितकाम्यया॥ ब्रह्मसूत्रं करिष्यामि सर्वश्रुत्यर्थसिद्धये॥७॥ दर्शयिष्यामि वेदार्थं भारतव्यपदे ॥२७॥
शतः। वेदशाखा[illegible]सु नष्टासु वेदार्थे भारते कलौ॥ दृश्यते नात्र संदेहः कर्तव्यः केनचित्क्वचित्॥

॥भारते भगवद्गीताख्यसर्वसंशयापहा॥ इति कल्पतरोः साक्षात्फलं भागवतं ततः। गीतार्थाद्विस्तरे
ण इदं वक्ष्यामि च विशेषतः॥१०॥ तेन रूपेण वेदार्थं यद्वक्ष्यामि तदेव तत्॥ तं यो न मन्यते मूढः स पाषंडी
नराधमः॥११॥ न विष्णुतः कलौ सृष्टिरासुरी ब्राह्मणेष्वपि तारुवहृयं वेदार्थं अन्यथा हि यथेच्छया॥१२॥ ति
कृष्णद्वैपायनाख्योऽहं संभविष्यामि सर्वथा॥ इत्युक्त्वाजं स भगवांस्तत्रैवांतरधीयत॥१३॥ ततः पराशरा
ज्जातः सत्यवत्यां महायशाः। यदर्थमवतीर्णोसौ तत्तथैव चकार ह॥१४॥ अतः कृष्णद्वैपायनदर्शितो वेदा
र्थः सर्वोपि निषत्सु याज्ञवल्क्यादिभिर्यदुपदिष्टं ब्रह्म गार्ग्यादिषु तदेव देवकीपुत्रः कृष्ण एव॥ स एव
साकारो व्यापी निर्गुणश्च॥ यथोक्तं बृहदारण्यके॥ ॥प्राणस्य प्राणमुत चक्षुरुत श्रोत्रस्य श्रोत्रं मन
श्र४ सो मनो ये विदुरिति॥ विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्॥ सं बाहुभ्यां धम
ति संपतत्रैर्द्यावाभूमी जनयं देव एकः॥ श्रीभगवद्गीतासु तावच॥ सर्वतः पाणिपादं तं सर्वतोक्षिशिरो
मुखं॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥१॥ इत्यत्र लौकिकयुक्त्या निर्णेतुमशक्यत्वात्॥
अतो वेदवाक्यार्थः तत एव मंतव्यः॥ अत एव सर्ववेदार्थदर्शितो बादरायणेन श्रोतव्यादि निरूप्य

दृष्टत्वसमये गीतावक्तृत्वेन नन्दकृष्णाख्यब्रह्मदर्शितं॥ महाभारते सर्वशास्त्रेंधर्मविलक्षणं। आ
नंदमात्रकरपादमुखोदरादिजन्मनामकर्मगुणलीलासहितं सांशं छद्मं कृष्णाख्यमेव ब्रह्म श्रीभ
गवतेशुकेनापिगीतं॥ व्यासेनापिकथितं॥ अ तो ज्ञायते॥ सर्ववेदता[illegible]त्पर्यीतत्कृष्णाख्यंब्रह्म॥
एवं पराशरेणापि विष्णुपुराणे॥ ब्रह्मपापादिष्वपि नराकृति परं ब्रह्मेति॥ अतः सर्वेवतारा
कृष्णाख्यस्य॥ अवतारी श्रीकृष्ण एव॥ येन्ये वैष्णवसिद्धांतवादिनोप्याचार्याः सर्वेवतारा
स्तुल्या इति वदंति तेषामवतारांतरे सर्वात्मना सत्वबुद्धिस्तदंशत्वात्॥ ये यदंशाः स तन्
जे इति वाक्यात्॥ स्वोपास्यावतारेंशत्वकथनं भक्तिमार्गविरुद्धं॥ अतस्तेषां तथैव व्याख्या
नमुचितं। स्वेष्टोत्कर्षख्यापकत्वात्। भगवतोपि सर्वकरणसमर्थत्वादुचितमेव। येयथा
मां प्रपद्यंते तांस्तथैतिवाक्यात्। परं श्रुतीतिहासपुराणार्थविदिनाश्रीबादरायणेन कर्मज्ञा
नोपासनाकांडात्मकस्य वेदराशेस्तात्पर्यं छद्मसाकारब्रह्मणोनंतरूपत्वेपिमूलरूपंदेव ।३५॥
कीपुत्र एवेत्युक्तं। यथोक्तं भगवता॥ सर्वस्यचाहंहृदिसंनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं २

वा ॥ वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदेव चाहमिति । यस्मात्क्षरमतीतोहमक्षरा
दपि चोत्तमः ॥ अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१॥ यो मामेवमसंमूढो जा
नाति पुरुषोत्तमं ॥ स सर्वविद्भजति मां सर्वभावेन भारत ॥२॥ अहमेवेत्येवकारेणाय
थाहृष्टः शुद्धसाकारोहमेव पुरुषोत्तमत्वेन । श्रीकृष्णे ज्ञाते सर्वविद्भजति ॥ सर्वभावेन
श्रीकृष्णमेव भजति । अधिभूतं क्षरो भाव इति क्षरः पुरुषः प्रकृतिः पुरुषश्चात्मा परमा
त्मा नवपुरा । यद्रूपं समधिष्ठाय तदक्षरमुदीयते ॥१॥ इत्यक्षरः पुरुषः । तयोर[illegible] पुरुषोत्त
मः पुरुषोत्तमः श्रीकृष्ण एव ॥ असावेव कलावतारः ॥ यथोक्तं तृतीयस्कंधे मैत्रेयेण ॥ पूर्वस्या
दौ परार्धस्य ब्राह्मो नाम महानभूत् ॥ कल्पो यत्राभवद्ब्रह्मा शब्दब्रह्मेति यं विदुः ॥ तस्यैवां
ते कल्पोभूद्यं पाद्ममभिचक्षते ॥ यद्धरेर्नाभिसरस आसील्लोकसरोरुहं ॥ अयं तु क
थितः कल्पो द्वितीयस्यापि भारत ॥ वाराह इति विख्यातो यत्रासीच्छूकरो हरिः ॥ अत्र

केचिदिति व्याख्यानं कुर्वंति ॥ पूर्वस्य परार्द्धस्यादौ ब्राह्मो नाम महान् कल्पो ब्राह्म
कल्पेः वर्षमानेन नरा तत्वर्षसंख्यः अभूत् ॥ यत्र ब्रह्मा अभवत् । यं शाब्दब्रह्मेति विदुः ॥
तस्यैव ब्राह्मकल्पस्यांते पाद्मो नाम महाकल्पोऽभूत् ॥ यत्र हरेर्नाभिसरसः पद्ममा
सीत् ॥ पुनः अयं वराह इति विख्यातो ॥ महाकल्पो द्वितीयस्यापि अंते पाद्मकल्पस्या
प्यंते अभूत ॥ अतः पूर्वपरार्द्धे वराहकल्पस्यैव ॥ अवतारग्रहणात् सर्वब्राह्मपाद्मावांत
तां ॥ प्रतिपुराणं महाकल्पाः कल्पभेदाध्याये मत्स्यपुराणे पठिताः ॥ तत्र सारस्वतकल्पी
यं श्रीभागवतवृत्तांतं ॥ यथोक्तं मत्स्यपुराणे ॥ सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः ॥
नवृत्तांतोद्भवं लोके श्रीभागवतमुच्यते ॥ तत्र भगवान् पुरुषोत्तमः स्वयं पूर्वोऽवतीर्णः ॥
तस्मात्तु भगवान् स्वयं ॥ अत्र भगवान् पुरुषोत्तमः जगृहे पौरुषं रूपं भगवान् महदा २६
दिभिः ॥ अत्र भगवान् पुरुषोत्तमः पौरुषं रूपं जगृहे इति पुरुषावतारं गृहीतवान्

अवतारमालाकथनांते स्कंदे तोक्तं ॥ एते चांशकलाः सर्वे कृष्णस्तु भगवान्स्वयं ॥ अत्र
भगवानिति पदं आदौ जगृहे ॥ पौरुषं रूपं अत्रापि भगवानिति पदं श्रीकृष्णस्य एव प्रतिपाद
कं ॥ भगवान्नारायण इति यौव्यां रम्यातं ॥ यस्यांभसि शयानस्य तस्मिन्पदे नारायण
त्वं पौरुषे रूपे एव ॥ एतन्नानावताराणां निधानं बीजमव्ययं इति वाक्यात् ॥ सर्वेवतारा
नारायणरूपमेव पर्यवसिताः ॥ पुरुषो ह नारायणो कामयत इति श्रुतेः ॥ अत एव स
र्वैरवतारैरंशावेशकला विभूतिभिः सहितं नारायणाख्यं पौरुषं रूपं भगवति पुरु
षोत्तमे श्रीकृष्णे यदेवास्ति ॥ अत एव ह [illegible] एवं श्रीकृष्णे देवकीपुत्रे ॥ सर्वेष्ववतारेषु या
वत्यो ज्ञानक्रियाशक्तयः प्रत्येकं संति सर्वा एकस्मिन्नेव देवकीपुत्रे संति ॥ अतो देव
कीपुत्रश्रीकृष्णा गीतावेदवेदार्थनिर्णयसंदेहे प्रमाणं ॥ अतः श्रीभागवते आदिप्रश्नाद्वार
भ्य सूतजानासि भद्रं ते भगवान्सात्वतां पतेः ॥ देवक्यां वसुदेवस्य [illegible] स्य जो

तोयस्पर्शीकार्यार्थं प्रतिस्कंधं सर्वावतारचरितसंक्षिप्तनिरूपणे श्रीकृष्णचरितस्य वि
स्तरनिरूपणेन भगवतः श्रीकृष्णद्वैपायनस्याभिप्रायः सर्वेऽवतारास्तु व्याप्ता इति भवंति
अतः श्रीकृष्ण द्वैपायन एव पूर्णाः मत्स्यादिभिः पुराणेषु कर्मज्ञानभक्तिमार्गाः सत्यव्रतादीन्
प्रत्यक्षाः संति ॥ वेदार्थनिर्णयः संमतो संन्यासिनामनुदिनपाठे श्रीभगवद्गीतैव ॥ अतो ज्ञा
प्यते सर्वोपनिषदुक्तं परं ब्रह्म श्रीकृष्ण एव ॥ यथा सारस्वतकल्पे श्रीकृष्णाख्यं पूर्णं ब्रह्मा
दीन् कल्पान् ॥ ब्रह्मणो दैनं दिनान् वदंति ॥ तस्मिन्नपि ब्रह्मण एकवर्षमध्ये प्रतिदिनं
अनुकल्पं त्रीणि शतानि षष्ट्याधिकानि श्रीकृष्णावतारा भवंति ॥ पूर्णत्वं सारस्वतकल्पी
ये ॥ महाकल्पवादिनां मतेऽपि सारस्वतकल्पस्यास्याभिचारः ॥ अन्यकल्पेषु श्रीकृष्णाव
तारेष्वंशत्वं पुराणेषु तथैव ॥ प्रतिपादितत्वात् ॥ देवतात्वं मंत्राधीनत्वात् ॥ मंत्रा
धीनाश्च देवता इति वाक्यात् ॥ अतो वैदिकैस्तांत्रिकैर्वैदितंत्रोक्तविधिना श्रीकृष्ण

वतारकृपाणिउपास्यंते। तान्यंशावतारस्यैव॥ अतो वेदतंत्रोक्तो मार्गउपासनामार्ग एवं
मुक्तिमुक्तिभक्तिसाधकस्य भक्तियोगसंजन्नते। एवं यः इज्यते तमामिति। भगवद्वाक्यात्॥
स्वर्णस्याराधन्ते श्रीमद्भागवतोक्त एव भक्तिमार्गः। तद्यथा। चतुर्णां वेदानामुपनिषदां तत्त्वमस्या
दिमहावाक्यानि नचारि इतिहासपुराणानामनेक॥ एवं पंचमहावाक्यानि। तेषामर्थः सं
। वैर्यथा प्रकाशति विचारितः। एके ब्रह्मजीवयोरैक्यं वदंति। तत्त्वंपदार्थस्य उपदेश समये पि
भेद एव ज्ञायते॥ आत्मत्वेन ब्रह्मणि ज्ञाते सति सर्वतोधिक श्रेमास्पदमात्मैव। तद्ब्रूत्वमसि
तस्य त्वमसीति केचित्॥ आत्मैव श्रोतव्यः सत्वमसि तदीयो सिवा अतो यः श्रेमास्पदं सज्जनी
यः॥ अनयारीत्या महावाक्यार्थं सद्गुरुमुखात् ज्ञात्वा शिष्यस्तेदशाधिमां त्वां प्रपन्नमिति व
तश्यामसुंदर तेदास्य इति वत॥ सकृदेव प्रपन्नाय तवास्मीति याचते॥ अन्यं सर्वथा दास्य इ
ानम ति व्रतं ममैतत्यवगौति सद्गुरुवाक्यात् आत्मसमर्पणं कृत्वा सेवा कथा स्यामेव भजनं कार्यं। इ

तिर्भक्तिमार्गः यथोक्तं भगवगवद्गीतासु ॥ भगवतार्जुनं प्रति ॥ अहं सर्वस्य प्रभवो मत्तः
सर्वं प्रवर्त्तते । इति मत्वा भजंते मां बुधा भावसमन्विताः ॥ भक्तिलक्षणं सात्वततंत्रे ॥ माहा
त्म्यज्ञानपूर्वस्तु सुदृढः सर्वतोऽधिकः । स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा ॥ अ
हं सर्वस्य प्रभवो मत्त इति सर्वतोऽधिकः सुदृढतरो प्युक्तः भजनप्रकारमाह ॥ मच्चित्ता मद्गतप्रा
णा बोधयंतः परस्परं । कथयंतश्च मां नित्यं तुष्यंति च रमंति च ॥ मच्चित्ता इति पंचेंद्रियज्ञानें
द्रियपंचस्य व्यापारो भगवत्युक्तः मद्गतप्राणा इति कर्मेंद्रियव्यापारो भगवत्युक्तः । मद्गतत्वे त्यैव
न निर्दोषत्वं ॥ मलांशत्यागेन प्राणस्य हि क्रियाशक्तिरिति वाक्यात् ॥ बोधयंतः परस्परमिति
समानशीलैरेव संगोप्युक्तः ॥ कथयंतश्च मां नित्यमिति श्रीभागवतादि श्रवणकीर्तनमप्युक्तं
एवं सेवाकथालक्षणा भक्तिः सिद्धा ॥ सैव फलरूपा जातेति ॥ तुष्यंति च रमंति चेत्यनेन निरूपितं ॥ ३
ब्रह्मभावादनंतरमीदृशी भक्तिर्भक्तेभ्यो भगवानेव ददाति ॥ तत्साधनैः ॥ यथोक्तं ब्रह्मभू

तः प्रसंन्नात्मा न शोचति न कांक्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ॥१॥ अतः प्राक्
ब्रह्मानंदोपि शुको व्यासाद्भागवतमधीत ॥ श्रीकृष्णस्यानंतगुणगणैकालविश्री भागवत
कीर्त्तनादेव प्रहृष्टः ॥ अतो ज्ञायते श्रीकृष्णस्वरूपमेव सर्वदेवतात्यर्थपरं ब्रह्म ॥ ये यस्मिन्कल्पे मन्वंत
रे युगे मत्स्यादि भगवद्रूपाण्याराध्यंते ॥ तेषु तेषु भगवद्रूपेषु सायुज्यादि भावं गताः ॥ तेषां तदे
व फलं ॥ ये वा श्रीकृष्ण एव सर्वशास्त्रतात्पर्यं तेषां सारस्वतकल्पीयपूर्णकृष्णावतारे भजनानं
दानुभवैः फलं ॥ अनेकमहाकल्पपर्यंतं कृतसाधनानां सर्वावतारभजनस्यापि यथा श्री
शुकस्य यथा श्रुतिरूपगोपिकानां ॥ यथाग्निकुमाराणां ॥ श्रुतिरूपगोपिकानां बृहद्वामनपु
राणे कथास्ति ॥ अग्निकुमाराः श्रीरघुनाथवरदानतः गोपिकात्वं प्राप्ताः इति कूर्मपुराणे कथा ॥
व्रजस्त्रीजनसंतति श्रुतिभ्यो ब्रह्मसंगतः ॥ इत्याथर्वणी श्रुतिः ॥ रहस्यमिदमाहादौ ब्रह्मणे पुरुषो
त्तमः ॥ स नारदाय प्रोवाच कृष्णद्वैपायनाय सः ॥ स आह शुकदेवाय ततो मार्गस्तिरोऽभवत् ॥ अतः

कलियुगेत्राद्य श्रीगोपीजनवल्लभः ॥ श्रीविष्णुस्वामिने प्राह तस्मात्प्रवर्त्तोऽभवत् ॥ आचार्याः
सर्वतत्त्वज्ञाः तस्य मार्गप्रवर्त्तकाः ॥३॥ तेभ्यः कालक्रमेणैव भगवद्बिंबभंगेन ॥ ततः स्तिरोहिते
मार्गे वर्षसप्तशतं कलौ ॥४॥ ततो निरूपीन् भगवान् श्रीवल्लभ इति श्रुतः ॥ प्रादुर्बभूव तस्मै स
प्राह स्वेच्छया विद्वान् ॥ बिंबभंगस्य नामात्र तिरोभूयस्थितस्य च ॥ श्रीवल्लभसुतः श्रीमान् श्री
विठ्ठल इति प्रभुः ॥ तेन श्रीवल्लभनाम्ना श्री रहस्यं राधिकापतेः ॥ श्रीविठ्ठलसुताः सर्वे स्वामी तागिरिधरा
दयः ॥ भगवद्भक्तिं कुर्वन्त आयुष्मंतो भवंति ह ॥ श्रीवल्लभप्रोक्त श्रीविष्णुस्वामिसंप्रदाये सर्वतोधि
कं वसुपंचकं भगवता स्थापितं ॥ गुरुसेवा भागवतार्थः भगवत्स्वरूपनिर्णयो भगवत्सेवा नैरपेक्ष्य
मिति ॥ यद् त्वाक्यं गदाख्येन लिखित्वा उक्तकेऽधुना ॥ संप्रदायप्रदीपं तत् सत्यमस्तु हरीच्छया ॥ जप
वास तत्त्वं ये ब्रुवंति ऊर्धियो व्यापकत्वं च जीवे न वेदार्थो येषां भवति च कश्चित्तस्य मार्गानुसारी ॥
नानिणीतं सर्वं स्वहृदि च परं साल्प तिप्र लभुद्धं न तेभ्य शुश्रूषा न च विद्विषा नो विवहाममास्ति ॥ ॥
वि

अर्बुदारंण्यसंजातो द्विवेदीति गदाभिधः । संप्रदायप्रदीपाख्यं ग्रंथमेतं चकार सः ॥१॥ वासं
कृत्वा वृंदारंण्ये ध्यात्वा चित्तं श्रीराधसे ॥ ग्रंथं कृत्वा गदानामा तत्कृतोऽस्तु [illegible] तस्मातं ॥२॥ अर्बु
दादग्निदिग्भागे अघोरगिरिसंन्निधौ । एकलिंगशिवद्देवात्तनैरुत्यां दिशि विश्रुतं ॥३॥ सर्वसेवो
पकरणं रूपामसुंदरमंदिरं । वसंति तत्र तत्सेवां कुर्वंतश्च कृपांमुदा गदाख्यद्विजपौत्राद्या रामदत्ता
दयः कृताः ॥४॥ श्रीवल्लभोक्तमार्गेण कृष्णसेवापराः सदा ॥५॥ भवंतु सुखिनः सर्वे श्रीकृष्णस्य प्रसादतः ॥
तेषुनितसंप्रसंन्नोस्तु श्रीमद्वल्लभनंदनः ॥६॥ मदन्वयस्वीकरणे सदा भवतु वल्लभनः ॥ ॥ श्रीमन्नृप
विक्रमार्कसमयात् षोडशताधिकदशमसंवत्सरे श्रीमन्नृपे श्रीवृंदावने श्रीगोविंददेवसांन्नि
ध्ये द्विवेदीगदाख्येन ग्रंथोयमकारि ॥ ॥ इति संप्रदायप्रदीपे श्रीकृष्णाख्यवृत्तनिर्णये पंचमं
प्रकरणं समाप्तं ॥ ॥ चिरंजीवत्विहाचार्यः श्रीमद्वल्लभनंदनः ॥ अंजसायस्त्रसादेन सिद्धांत
मिदमध्यगां ॥१॥ इति ॥ संवत् ७३५ वर्षे मार्गशीर्षशुद्ध १५ सोमे लिखितोयं ग्रंथः आत्मारामेण